VYAKARANAM

ACHARYA I YEAR

Paper - III

VAIYAKARANA SIDDANTHA BHUSHANASARAH

PART - A

Directorate of Distance Education

Rashtriya Sanskrit Vidyapeetha
Accredited at 'A' level by NAAC
Tirupati - 517 064 (A.P.)

वैयाकरणसिद्धान्तभूषणसारः

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्त्तते ।। १ ।।

अशेषफलदातारं भवाब्धितरणे तरिम्।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ।। २।।

पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टभिधं
द्वैतध्वान्तनिवारणादिफलिकां पुम्भाववाग्देवताम्।
ढुण्ढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये ।। ३।।

नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम्।
श्रीकौण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम्।।*

</मङ्गलम्>

<ग्रन्थारम्भः>

प्रारिप्सितप्रतिबन्धकोपशमनाय कृतं श्रीफणिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते-

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत एवाऽर्थः सङ्क्षेपेणेह कथ्यते ।। १।।

उद्धृत इति। अत्र 'अस्माभिः' इति शेषः। 'भाष्याब्धेः शब्दकौस्तुभ उद्धृतः' इत्युक्तिस्तु शब्दकौस्तुभोक्तानामर्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय। अन्यथा तन्मूलकस्याऽस्य ग्रन्थस्याप्याधुनिकोत्प्रेक्षितासारत्वापत्तौ पाणिनीयानामनुपादेयतापत्तेः।'तत्र निर्णित' इत्युक्तिरितोऽप्यधिकं जिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुम् ।। १।।

</ग्रन्थारम्भः>

अथ धात्वर्थनिर्णयः

धात्वाख्यातार्थविषये वैयाकरणमतम्

प्रतिज्ञातमाह-

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।। २ ।।

धातुरित्यत्र स्मृत इति वचनविपरिणामेनाऽन्वयः।

फलम्=विक्लित्त्यादि।

व्यापारस्तु भावनाभिधा=साध्यत्वेनाऽभिधीयमाना क्रिया।

उक्तञ्च वाक्यपदीये-

'यावत् सिद्धमसिद्धं वा साध्यत्वेनाऽभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यऽभिधीयते।। इति ।।

न च साध्यत्वेनाऽभिधाने मानाभावः, 'पचति, पाकः, करोति, कृतिः' इत्यादौ धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्। तथा च क्रियान्तराकाङ्क्षाऽनुत्थापकतावच्छेदकरूपं साध्यत्वम्। तद्रूपवत्त्वमसत्त्वभूतत्वम्। एतदेवाऽऽदाय

'असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते।'

इति वाक्यपदीयमिति द्रष्टव्यम्।

अयञ्च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः, पचतीत्यादौ तत्तत्प्रकारक-बोधस्याऽनुभवसिद्धत्वात्। न च नानार्थतापत्तिः, 'तदादि'न्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकाना-मनुगमकस्य सत्त्वात्। आख्याते क्रियैकत्वव्यवस्थाऽपि अवच्छेदकबुद्धिविशेषैक्यमादायैव। उक्तञ्च वाक्यपदीये-

'गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्धया प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते।।' इति ।

तिङर्थः

धात्वर्थं निरूप्य तिङ्र्थमाह-

आश्रये त्विति-फलाश्रये, व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म्म, व्यापाराश्रयः कर्त्ता। तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिः, अन्यलभ्यत्वात्। शक्ततावच्छेदकं चाश्रयत्वं तत्तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते।

कर्तृकर्मणोः आख्यातार्थत्वे प्रमाणम्

नन्वनयोराख्यातार्थत्वे किं मानम्। प्रतीते र्लक्षणया आक्षेपात् प्रथमान्तपदाद्वा सम्भवादिति चेत्-

अत्रोच्यते-'लः कर्म्मणि च भावे चाऽकर्म्मकेभ्यः'(पा० सू० 3-4-69) इति सूत्रमेव मानम्। अत्र हि चकारात् 'कर्त्तरि कृत्'(पा० सू० 3-4-68) इति सूत्रोक्तं कर्त्तरीत्यनुकृष्यते। बोधकतारूपां तिबादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे प्रकल्प्य लकाराः कर्मणि कर्त्तरि चानेन विधीयन्ते, नकारविसर्गादिनिष्ठां कर्मकरणादिबोधकताशक्तिमादाय शसादिविधानवत्।

न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे। तथाच कर्तृत्वम्-कृतिः, कर्म्मत्वञ्च फलमेवार्थोऽस्त्विति शङ्क्यम्, फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनाऽयोगात्।

अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेत्, तर्हि कृतामपि कर्तृकर्म्मादिवाचित्वं न सिद्धयेत्, 'कर्त्तरि कृत्' इति च'लः कर्म्मणि' इत्यनेन तुल्ययोगक्षेमम्।

अपि च मीमांसकानां कृतामिवाऽऽख्यातानामपि कर्तृवाचित्वमस्तु, भावनाया एवाऽऽक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं माऽस्तु।

तथा सति प्राधान्यं तस्या न स्यादिति चेन्न, 'घटमानय' इत्यादावाक्षिप्तव्यक्तेरपि प्राधान्यवदुपपत्तेः। पचतीत्यादौ पाकं करोतीति भावनाया विवरणदर्शनाद्वाच्यत्वमिति चेन्न, पाकाऽनुकूलव्यापारवतः कर्त्तुरपि विवरणविषयत्वाऽविशेषात्।

न च कर्त्तुर्विवरणं तात्पर्याऽर्थविवरणम्,पाकं करोतीत्यशब्दाऽर्थकर्मत्वविवरणवत्, इतरेतरयोगद्वन्द्वे समुच्चयांऽशविवरणवद्वा न तदर्थनिर्णाकमिति वाच्यम्, भावनायामपि तुल्यत्वात्।

किञ्च, 'पचति देवदत्तः' इत्यत्राऽभेदान्वयदर्शनात्तदनुरोधेन कर्त्तुर्वाच्यत्वमावश्यकम् 'पक्ता देवदत्तः' इतिवत्। नचाऽभेदबोधे समानविभक्तिकत्वं नियामकम्, तच्चात्र नास्तीति वाच्यम्, 'सोमेन यजेत' 'स्तोकं पचति' 'राजपुरुषः' इत्यादावप्यभेदबोधाऽनापत्तेः।

नच लक्षणया कर्त्तुरुक्तत्वात् सामानाधिकरण्यम्, पिङ्गाक्ष्यादियौगिकानामपि द्रव्यवाचित्वाऽनापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि, 'अनेकमन्यपदार्थे' 'साऽस्य देवता' इत्यनुशासनेन पिङ्गे अक्षिणी यस्याः,

विश्वे देवा देवता अस्या इति विग्रहदर्शनात् प्रधानषष्ठयर्थे एव अनुशासनलाभात्।

तथाच 'अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति वाक्ये द्रव्याऽनुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्ये एवाऽन्वयप्रतिपादकाऽरुणाधिकरणोच्छेदाऽऽपत्तिः, द्रव्यवाचकत्वसाधकमूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरिति प्रपाञ्चितं विस्तरेण बृहद्वैयाकरणभूषणे।

तिङः इति। बोधकतारूपा शक्तिस्तिङ्क्ष्वेवेत्यभिप्रेत्येदम्।

वाक्ये भावनायाः एव मुख्यविशेष्यत्वम्

पदार्थं निरूप्य वाक्यार्थं निरूपयति-पले इत्यादि। विक्लित्त्यादि फलं प्रति।

तिङर्थानाम् विशेषणत्वेन अन्वयप्रतिपादनम्

तिङर्थः-कर्त्तृकर्मसंख्याकालाः। तत्र कर्त्तृकर्मणी फलव्यापारयोर्विशेषणे।

तिङर्थसंख्यायाः कुत्रान्वय इति निर्धारणम्

संख्या कर्त्तृप्रत्यये कर्तरि, कर्मप्रत्यये कर्मणि, समानप्रत्ययोपात्तत्वात्।

तथाच 'आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्यकर्त्तृकर्मोपस्थिर्हेतुः' इति कार्यकारणभावः फलितः।

तत्र नैयायिकमतनिरासः

नैयायिकादीनामाख्यातार्थसङ्ख्यायाः प्रथमान्तार्थे एवाऽन्वयात् 'आख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुः' इति कार्यकरणभावो वाच्यः। सोऽपि 'चन्द्र इव मुखं दृश्यते' 'देवदत्तो भुक्त्वा व्रजति'इत्यादौ चन्द्रक्त्वार्थयोराख्यातार्थानन्वयादितराऽविशेषणत्वघटित इत्यतिगौरवम्। इदमपि कर्तृकर्मणोराख्यातार्थत्वे मानमिति स्पष्टं भूषणे।

तिङर्थकालस्य व्यापारविशेषणत्वम्

कालस्तु व्यापारे विशेषणम्, तथाहि -'वर्त्तमाने लट्' (पा० सू० 3-2-123) इत्यत्राऽधिकाराद् धातोरिति लब्धम्। तच्च धात्वर्थं वदत् प्राधान्याद् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। नच सङ्ख्यावत् कर्त्तृकर्मणोरेवान्वयः शङ्क्यः,अतीतभावनाके कर्त्तरि पचतीत्यापत्तेः,अपाक्षीदित्यनाफ्त्तेश्च। पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च। नापि फले तदन्वयः,फलाऽनुत्पत्तिदशायां व्यापारसत्त्वे, पचतीत्यनापत्तेः, पक्ष्यतीत्यापत्तेश्चेत्यवधेयम्।

नचाऽऽमवातजडीकृतकलेबरस्योत्थानाऽनुकूलयत्नसत्त्वादुत्तिष्ठतीति प्रयोगापत्तिः, परयत्नस्याज्ञानादप्रयोगात्। किञ्चिच्चेष्टादिना तदवगतौ च, अयमुत्तिष्ठति, शक्त्यभावात् फलन्तु न जायते इति लोकप्रतीतेरिष्टत्वात्।

एवञ्च तिङर्थो विशेषणमेव,
भावनैव प्रधानम्।

यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टम्, तथाऽपि 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि' इति (नि० अ० 2 ख २) निरुक्तात्, भूवादिसूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च धात्वर्थभावनाप्राधान्यमध्यवसीयते।

आख्यातार्थकर्तृकर्मणोः प्राधान्यवादिविशिष्टाद्वैतिमतखण्डनम्

अपिच, आख्यातार्थप्राधान्ये तस्य देवदत्तादिभिः सममभेदान्वयात् प्रथामान्तस्य प्राधान्यापत्तिः। तथाच, 'पश्य मृगो धावति' इत्यत्र भाष्यसिद्धैकवाक्यता न स्यात्, प्रथमान्तमृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्म्मत्वापत्तौ द्वितीयापत्तेः।

नचैवमप्रथमासामानाधिकरण्याच्छतृप्रसङ्गः, एवमपि द्वितीयाया दुर्वारत्वेन 'पश्य मृगः' इत्यादिवाक्यस्यैवाऽसम्भवापत्तेः।

न च पश्येत्यत्र तमिति कर्माध्याहार्य्यम्,वाक्यभेदप्रसङ्गात्, उत्कटधावनक्रियाविशेषस्यैव दर्शनकर्मतयाऽन्वयस्य प्रतिपिपादयिषितत्वात्, अध्याहारेऽनन्वयापत्तेश्च।

प्रथमान्तमुख्यविशेष्यत्ववादिनैयायिकमतखण्डनम्

एवञ्च, 'भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणम्' इति नैयायिकोक्तं नादरणीयम्। किन्तु 'आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणम्' इति कार्यकारणभावो द्रष्टव्यः। भावनाप्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद् धात्वर्थभावनोपस्थितिरपि हेतुः, 'पस्य मृगो धावति', 'पचति भवति' इत्याद्यनुरोधादिति दिक्।

इत्थञ्च पचतीत्यत्रैकाऽऽश्रयिका पाकाऽनुकूला भावना। पच्यते इत्यत्रैकाऽऽश्रया या विक्लित्तिस्तदनुकूला भावनेति बोधः।

देवदत्तादिपदप्रयोगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याऽभेदाऽन्वयः। 'घटो नश्यति'इत्यत्र घटाऽभिन्ना-ऽऽश्रयको नाशाऽनुकूलो व्यापार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानम्। अत एव तस्यां सत्यां नश्यति, तदत्यये 'नष्टः' तद्भावित्वे नङ्क्ष्यतीति प्रयोगः। 'देवदत्तो जानाति', इच्छती'त्यादौ च देवदत्ताऽभिन्नाऽऽश्रयको ज्ञानेच्छाद्यनुकूलो वर्त्तमानो व्यापार इति बोधः। स चान्तत आश्रयतैवेतिरीत्योह्यम् ।। २ ।।

आख्यातार्थकर्तृकर्मणोः तात्पर्यग्राहकाः

नन्वाख्यातस्य कर्तृकर्मशक्तत्वे 'पचति' इत्यत्रोभयबोधापत्तिः। कर्तृमात्रबोधवत् कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह-

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।
व्यापारे शप्श्नमाद्यास्तु द्योतयन्त्याश्रयाऽन्वयम् ।। ३ ।।

तङादयः फले आश्रयाऽन्वयं द्योतयन्ति, फलाऽन्वय्याश्रयस्य कर्मत्वात्। तद्द्योतकाः=कर्मद्योतकाः। व्यापाराऽन्वय्याश्रयस्य कर्तृत्वात्। तद्द्योतकाः=कर्तृद्योतका इति समुदायार्थः। द्योतयन्ति=तात्पर्य्यं ग्राहयन्ति ।। ३ ।।

नन्वेवं 'क्रमादमुं नारद इत्यबोधि स' इत्यादौ, पच्यते ओदनः स्वयमेव' इत्यादौ च व्यभिचारः, कर्मणः कर्त्तृत्वविवक्षायां कर्त्तरि लकारे सति, 'कर्मवत् कर्मणा तुल्यक्रियः' (पा० सू० 3-1-87) इत्यतिदेशेन यगात्मनेपदचिण्चिण्वदिटामतिदेशाद्यगादिसत्त्वेऽपि कर्त्तुरेव बोधात्, व्यापारे एवाश्रयान्वयाच्च। अबोधीत्यत्रापि बुध्यतेः कर्त्तरि लुङ्, तस्य "दीपजन" (पा० सू० 3-1-61) इति चिण्, 'चिणो लुक्' (पा० सू० 6-4-104) इति तस्य लुग् इति साधनादित्याशङ्कायामाह-

उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्य्ययात्।
तस्माद् यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ।। ४ ।।

कर्मकर्तृविषयादौ=पच्यते ओदनः स्वयमेव, इत्यादौ। अत्र ह्येकौदनाभिन्नाश्रयकः पाकानुकूलो व्यापार इति बोधः।

'क्रमात्' इति आदिपदग्राह्यम्। अत्र 'सामान्यविशेषज्ञानपूर्वक एकनारदविषयकज्ञानाऽनुकूलः कृष्णाभिन्ना-श्रयकोऽतीतो व्यापारः' इति बोधः। यथोचितमिति= सकर्मकधातुसमभिव्याहृतभावसाधारण-विधिवेधेयचिण्यगादि कर्मद्योतकमिति भावः ।। ४ ।।

लिङतिरिक्तलडाद्यन्ते भावनायाः अवाच्यत्ववादिप्राभाकरमतखण्डनम्

एवं सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य 'फलव्यापारयोः' इति प्रतिज्ञातं

धातोर्व्यापारवाचित्वम्, लडाद्यन्ते भावनाया अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति-

भावना-क्रिया-व्यापारः-उत्पादना इत्येतेषाम् पर्यायता

व्यापारो भावना सैवोत्पादना सैव च क्रिया।
कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते ।। ५ ।।

पचति=पाकमुत्पादयति, पाकानुकूला भावना, तादृश्युत्पादना इति विवरणाद् विक्रियमाणस्यापि तद्वाचकतेति भावः। व्यापारपदं च फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अत एव पचतीत्यत्र अधःसन्तापनत्व-फूत्कारत्व-चुल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः।

कृतित्वस्य शक्यतावच्छेदकत्वनिरासः

नचैवमेषां शक्यताऽवच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम्, 'रथो गच्छति' जानातीत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी, शक्यताऽवच्छेदकत्वस्यापि लक्ष्यताऽवच्छेदकत्ववद् गुरुणि सम्भवात्, तयोर्वैषम्ये बीजाभावात्।

करोतिनाविवरणात् आख्यातस्य यत्नार्थत्वमिति मतस्य खण्डनम्

नच पचति=पाकं करोतीति यत्नार्थककरोतिना विवरणाद् यत्न एवाऽऽख्यातार्थ इति वाच्यम्।

'रथो गमनं करोति'बीजादिना अङ्कुरः कृतः' इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः।

भावनायाः अवाच्यत्वे दोषप्रदर्शनम्

भावनायाः अवाच्यत्वे घटो भवतीत्यत्र घटपदात-द्वितीयापत्तिः

किञ्च, भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात्।

नचात्र घटस्य कर्तृत्वेन तत्संज्ञया कर्म्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम्, अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वेन घटस्याकर्तृत्वात्। कृत्याश्रयत्वस्य, कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्, धात्वर्थानुकूल-व्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्।

भावनायाः अवाच्यत्वे सकर्मकत्वाकर्मकत्वव्यवस्थानापत्तिः

अपिच भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्। 'स्वार्थफल-व्यधिकरणव्यापारवाचकत्वम्', 'स्वार्थव्यापारव्यधिकरणफलवाचकत्वम्' वा सकर्म्मकत्वं भावनाया वाच्यत्वमन्तरेणासम्भवि।

'अन्यतमत्वं तत्त्वम्' इति चेन्न, एकस्यैवार्थभेदेनाकर्म्मकत्व-सकर्म्मकत्वदर्शनात्। तदेतदभिसन्धायाह-कृञ इति।

व्यापारस्य अवाच्यत्वे फलमात्रस्य धात्वर्थत्वे दोषप्रदर्शनम्

अयं भावः-व्यापाराऽवाच्यत्वपक्षे फलमात्रमर्थ इति फलितम्। तथाच करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथाच 'यती प्रयत्ने' इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्म्मकतापत्तिरुक्तरीत्या दुर्व्वारेति।

तथाच 'न हि यत्नः' इत्यत्र फलस्थानीयत्वेनेति शेषः। कृञ इति-धातुमात्रोपलक्षणम्, सर्वेषामप्य-कर्म्मकता, सकर्म्मकता वा स्यादिति भावः।

धातोः केवलव्यापारवाचित्वनिरासः

अथवा, 'व्यापारो भावना' इत्यर्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत् साधयन् नैयायिकाभ्युपगतं जानाति-करोत्यादेः केवलज्ञान-यत्नादिक्रियामात्रवाचित्वं दूषयति-कृञ इति।

अयं भावः-फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथाच स्वार्थफलव्यधिकरणव्यापार-वाचित्वादिरूपसकर्म्मत्वोच्छेदापत्तिः। नच कृञादौ सकर्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम्, व्यावहारस्य भाक्तत्वेऽपि कर्म्मणि लकारासम्भवात्।

नहि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्य्यं कर्त्तुं शक्यम्। एवञ्च 'नहि यत्नः' इत्यत्र यत्नमात्रमित्यर्थः ।। ५ ।।

फलस्यावाच्यत्वे कृञः कर्मकर्तरि कर्मवद्भावानापत्तिः

अत एवाह-

किन्तूत्पादनमेवातः कर्म्मवत् स्याद् यगाद्यपि।
कर्म्मकर्त्तर्य्यन्यथा तु न भवेत् तद् दृशेरिव ।। ६ ।।

उत्पादनम्=उत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः।

फलस्य वाच्यत्वे युक्त्यन्तरमाह-अत इत्यादि। यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः। 'कर्मवत् स्यात्' इतिपदेन 'कर्म्मवत् कर्म्मणा तुल्यक्रियः' (पा० सू० 3-1-87) इति सूत्रं लक्ष्यते। अयमर्थः-यत एवास्योत्पादनार्थकता, अतः पच्यते ओदनः स्वयमेवेतिवत्, क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्म्मनिष्ठत्वाभावात् तन्न स्यात्, दृशिवत्। यथा दृश्यते घटः स्वयमेवेति न दर्शनस्य घटावृत्तित्वात्, तथा यत्नस्यापि, इति तथा प्रयोगानापत्तेरिति ।। ६ ।।

जानातीत्यादावपि कर्मकर्तरि कर्मवद्भावापत्तिशङ्का-तत्परिहारश्च

नन्वेवं कृञादेरिव जानातीत्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचित्वमावश्यकम्, अन्यथा सकर्म्मकतानापत्तेः। तथाच ज्ञायते घटः स्वयमेवेति किन्न स्यात्।

एवं ग्रामो गम्यते स्वयमेवेत्याद्यपीत्याशङ्कां मनसि कृत्वाह-

निर्वर्त्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते।
न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽत्र व्यवस्थितः ।। ७ ।।

ईप्सितं कर्म्म त्रिविधम्-निर्वर्त्त्यम्,विकार्य्यम्, प्राप्यञ्च। तत्राद्ययोः कर्म्मवद्भावः,नान्त्ये। प्राप्यत्वञ्चक्रियाकृत-विशेषानुपलभ्यमानत्वमिति सुबर्थनिर्णये वक्ष्यते। नह्ययं घटः केनचिद् दृष्टो ग्रामोऽयं केनचिद् गत इति शक्यं कर्म्मदर्शनेनाऽवगन्तुम्।

घटं करोतीति निर्वर्त्त्ये, सोमं सुनोतीति विकार्य्ये च तज्ज्ञातुं शक्यमिति न तत् प्राप्यम्। तथाच घटादेर्दृश्यादौ प्राप्यकर्म्मत्वान्नोक्तातिप्रसङ्ग इति भावः।

धातूनाम् फलावाचकत्वे त्यजिगम्योः पर्यायतापत्तिः

धातूनां फलावाचकत्वे त्यजिगम्योः पर्य्यायतापत्तिः, क्रियावाचकत्वाविशेषात्। फलस्योपलक्षणत्वेऽ-प्येकक्रियाया एव पूर्वदेशविभागोत्तरदेशसंयोगजनकत्वादुक्तदोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्म्मकाणां फलवाचकत्वम्।

अकर्म्मकाणां तु तन्निर्विवादमेव, "भू सत्तायाम्" इत्याद्यनुशासनाच्च । अत एव 'द्व्यर्थः पचिः' इति भाष्यं सङ्गच्छते इति दिक् ।। ७ ।।

फलमात्रं धात्वर्थः भावना तिङर्थः इति भाट्ट(मण्डनमिश्र)मतखण्डनम्

एवं सिद्ध्यतु फलव्यापारयोर्वाच्यत्वम्, किन्तु आख्यातवाच्यैव सा भावना, न धातोः, प्राधान्येन प्रतीयमानस्य व्यापारस्य धात्वर्थतायाः 'प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यम्' इतिन्यायविरुद्धत्वात् 'तदागमे हि दृश्यते' इति न्यायविरुद्धत्वाच्च।

एवञ्च 'स्वायुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्म्मकत्वम्, आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यम्' इत्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह-

तस्मात् करोतिर्धातोः स्याद् व्याख्यानं नत्वसौ तिङाम्।

पक्वान् कृतवान् पाकं किं कृतं पक्वमित्यपि ।। ८ ।।

तस्मात्=अभिप्रायस्थहेतोः।

स चेत्थम्-फलमात्रस्य धात्वर्थत्वे 'ग्रामो गमनवान्' इति प्रयोगापत्तिः, संयोगाश्रयत्वात्। फलानुत्पाददशायां व्यापारसत्त्वे 'पाको भवति' इत्यनापत्तिः, व्यापारविगमे फलसत्त्वे पाको विद्यत इत्यापत्तिश्च।

घञादेः अनुकूलव्यापारवाचित्वखण्डनम्

यत्तु, भावप्रत्ययस्य घञादेरनुकूलव्यापारवाचकत्वान्नानुपपत्तिरिति, तन्न, कर्त्राख्यातवत् 'कर्त्तरि कृत्' इत्यत एव तद्विधानलाभे भावे विधायकाऽनुशासनवैयर्थ्यापत्तेः, तद्विरोधापत्तेश्च। अथ व्यापारोऽपि धात्वर्थ इत्यभ्युपेयमिति चेत्तर्हि धातुत एव सकलव्यापारलाभसम्भवेनाख्यातस्य पृथक्शक्तिकल्पने गौरवमिति।

विवरणात्मा करोतिः धातोरेव व्याख्यानम्,न तिङां व्याख्यानम्

पचतीत्यस्य पाकं करोतीति विवरणात्मा करोतिर्धातोरेव व्याख्यानम्=विवरणम्, अतस्तदपि नाख्यातार्थत्वसाधकमिति भावः। मीमांसकोक्तं बाधकमुद्धरंस्तन्मतं दूषयति-नत्वित्यादिना।

नाऽसौ तिङां व्याख्यानम्, 'पक्ववान्' इत्यादावनन्वयापत्तेः।

अयं भावः-"प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्" इत्यत्र हि 'विशेष्यतया प्रकृत्यर्थप्रकारकबोधे(बोधम्प्रति)तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुः' इति कार्य्यकारणभावः फलितः। तथाच पक्ववानित्यत्र पाकः कर्म्मकारकम्, क्तवतुप्रत्ययार्थः कर्तृकारकम्। तयोश्चारुणाधिकरणोक्तरीत्या, वक्ष्यमाणाऽस्मद्रीत्या चान्वयासम्भव इति प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यौवाऽभावे क्व प्राधान्यबोधक उक्तकार्य्यकारणभावः। नच

संबन्धसामान्येन कारकाणामन्वय इत्यस्य खण्डनम्

सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते।।

इति भट्टपादोक्तरीत्या सम्बन्धसामान्येन कारकाणामन्वयः शङ्क्यः, योग्यताविरहात् अन्वयप्रयोजकरूप-वत्त्वस्यैव तथात्वात्।

क्रियात्वमेव हि कारकान्वयिताऽऽवच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्त्तुंविवरणेन धात्वर्थक्तवत्वर्थयोः कर्म्मत्व-कर्तृत्वे दर्शयति-'कृतवान् पाकम्' इति।

प्रत्ययार्थप्राधान्यनियमस्य औत्सर्गिकत्वम्

वस्तुतस्तु 'प्रत्ययार्थः प्रधानम्'इत्यस्य, यः प्रधानं स प्रत्ययार्थ एवेति वा, यः प्रत्ययार्थः स प्रधानमेवेति वा नार्थः, 'अजा' 'अश्वा' छागीत्यत्र स्त्रीप्रत्ययार्थे स्त्रीत्वस्यैव प्राधान्यापत्तेः, छाग्यादेरनापत्तेश्च। किन्तूत्सर्गोयम्।

विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात्। अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः। लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारक एव बोधः, न नैयायिकादीनाम्। घटः, कर्म्मत्वम्, आनयनं कृतिरित्यादौ विपर्य्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधः, न तु तद्व्युत्पत्तिरहितानाम्। अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं सङ्गच्छते।

अत एव " प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्" (पा० सू० 1-2-56) इत्याह भगवान् पाणिनिः।

'प्रधानं प्रत्ययार्थः' इति वचनम् ('न'इत्यनुवर्त्य) न कार्य्यम्, अर्थस्य=तथाबोधस्य, अन्यप्रमाणत्वात्= व्युत्पत्त्यनुसारित्वादिति हि तदर्थः। एवं सत्यपि नियामकापेक्षणे च "भावप्रधानमाख्यातम्" इति वचनमेव

गृह्यतामिति सुधीभिरूह्यम्।

तदागमेहीति न्यायो विवरणं च अतिव्याप्तम्

'तदागमे हि' इति न्यायो विवरणञ्चऽतिव्याप्तमित्याह-किं कृतं पक्वमिति।

कृञा विवरणं प्रतीतिश्च पक्वमित्यत्रापि, इति तत्रापि भावना वाच्या स्यादिति भावः।

कृतामपि भावनावाचित्वखण्डनम्

नन्वस्तु तिङ इव कृतामपि भावना वाच्येत्यत आह-अपीति-तथाचोभयसाधारण्येन तत्प्रतीतेरुभयसाधारणो धातुरेव वाचक इति भावः। भवद्रीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति द्रष्टव्यम् ।। ८ ।।

धातोः व्यापारावाचकत्वे कर्तरि कर्मणि च विहितानां कृताम् अन्वयासंभवः

साधकान्तरमाह-

किं कार्य्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि।
किञ्च क्रियावाचकतां विना धातुत्वमेव न ।। ९ ।।

'कार्य्यम्'इत्यत्र 'ऋहलोर्ण्यत्' (पा० सू० 3-1-184) इति कर्मणि ण्यत्। 'पचनीयम्' इत्यादौ चानीयर्। आदिना 'ज्योतिष्टोमयाजी' इत्यादौ करणे उपपदे कर्त्तरि णिनिः। एते च क्रिययोगमन्तरेणा-सन्तस्तद्वाच्यतां बोधयन्ति, विना क्रियां कारकत्वासम्भवेन तद्वाचकप्रत्ययस्याप्यऽसम्भवात्। नच 'गम्यमानक्रियामादाय कारकयोगः' इति भाट्टरीतिर्युक्ता, आख्यातेऽपि तथात्वापत्तौ तत्रापि भावनाया वाच्यत्वासिद्धयापत्तेः।

भावनायाः आक्षेप इत्यस्य निरासः

अथ लिङ्गसंख्यान्वयानुरोधात् कर्त्तुर्वाच्यत्वमावश्यकमिति तेनाऽक्षेपाद् भावनाप्रत्ययः स्यादिति मतम्, तर्हि संख्यान्वयोपपत्तये आख्यातेऽपि कर्त्ता वाच्यः स्यात्। 'पक्ववान्' इत्यादौ कालकारकान्वयानुरोधाद् भावनाया अपि वाच्यत्वस्याऽऽवश्यकत्वाच्चेति भावः।

नखभिन्न इत्यादौ समासो न स्यात्

अपिना हेत्वन्तरसमुच्चयः। तथाहि-नखैर्भिन्नः 'नखभिन्नः',हरिणा त्रातः 'हरित्रातः' इत्यादौ, "कर्तृकरणे कृता बहुलम्" (पा० सू० 2-1-32) इति समासो न स्यात्, 'पुरुषो राज्ञो भार्य्या देवदत्तस्य' इतिवद्, असामर्थ्यात्।

नखभिन्न इत्यादौ अध्याहृतक्रियामादाय न सामर्थ्यम्

नचाध्याहृतक्रियामादाय सामर्थ्यं वाच्यम्, 'दध्योदनः' 'गुडधानाः' इत्यादिवत्। अन्यथा तत्रापि "अन्नेन व्यञ्जनम्" (पा० सू० 2-1-34) "भक्ष्येण मिश्रीकरणम्" (पा० सू० 2-1-35) इति समासो न स्यादिति वाच्यम्, तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि 'हरिकृतम्' इत्यादौ साक्षाद्धात्वर्थान्वयेनोपपद्यमानस्य, "कर्तृकरणे" इत्यस्याक्षेपेण परम्परासम्बन्धे प्रवृत्त्ययोगात्।

एकक्रियान्वयित्वम् न सामर्थ्यम्

नचैकक्रियान्वयित्वमेव सामर्थ्यमिति शङ्कयम्, 'असूर्यम्पश्याः' इत्यादेरसमर्थसमासत्वानापत्तेः। इष्टापत्तौ कृतः सर्वो मृत्तिकयेत्यत्र 'कृतसर्वमृत्तिकः' इत्यापत्तेः। नचाऽत्र समासविधायकाभावः, "सह सुपा" (पा० सू० 2-1-4) इत्यस्य सत्त्वात्। अन्यथा असमर्थसमासोऽपि विधायकाभावान्न स्यादिति।

भावनायाः तिङर्थत्वे दोषप्रदर्शनम्

भावयति घटमितिवत् भवति घटमिति प्रयोगापत्तिः

किञ्च, भावनायास्तिङर्थत्वे 'भावयति घटम्' इतिवद् 'भवति घटम्' इत्यपि स्यात्, धात्वर्थफलाश्रयत्वरूपकर्मत्वसत्त्वात्। नचाख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्तत्संज्ञया कर्मसंज्ञाया बाधान्न

द्वितीयेति वाच्यम्, आख्यातार्थव्यापाराश्रयस्य कर्तृत्वे 'पाचयति देवदत्तो विष्णुमित्रेण' इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ तृतीयानापत्तेः, 'ग्रामं गमयति देवदत्तो विष्णुमित्रम्' इत्यत्र विष्णुमित्रस्याकर्तृतापत्तौ ग्रामस्य गमिकर्मत्वानापत्तेश्च। तथाच ग्रामाय गमयति देवदत्तो विष्णुमित्रम्, इत्यपि न स्यात्, "गत्यर्थकर्माणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" (पा० सू० 2-3-12) इति गत्यर्थकर्मण्येव चतुर्थीविधानात्। एतेन णिजन्ते आख्यातार्थ उभयम्,तदाश्रयत्वाद्देवदत्त-यज्ञदत्तयोः कर्तृतेत्यपास्तम्।

आख्यातशून्ये देवदत्तः पक्तेत्यादौ देवदत्तस्य कर्तृत्वं न स्यात्

किञ्च, 'तस्मिन् प्रयोगे य आख्यातार्थः' इत्यस्यावश्यकत्वेनाऽऽख्यातशून्ये-'देवदत्तः पक्ता' इत्यादौ देवदत्तस्याऽकर्तृतापत्तेरिति दिक्।

क्रियावाचित्वाभावे धातुत्वानापत्तिः

सूत्रानुपपत्तिमपि मानत्वेन प्रदर्शयन्नुक्तार्थस्य स्वोत्प्रेक्षितत्वं निरस्यति-किञ्चेति।

धातुसंज्ञाविधायकम्-"भूवादयो धातवः" (पा० सू० 1-3-1) इति सूत्रम्। तत्र भूश्च वाश्चेति द्वन्द्वः। आदिशब्दयोर्व्यवस्थाप्रकारकवाचिनोरेकशेषः। आदिश्च आदिश्च आदी, ततो भूवौ आदी येषां ते भूवादयः। तथाच भूप्रभृतयो वासदृशा धातव इत्यर्थः।तच्च क्रियावाचकत्वेन। तथाच 'क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वम्' पर्य्यवसन्नम्। अत्र क्रियावाचित्वमात्रोक्तौ वर्ज्जनादिरूपक्रियावाचके 'हिरुक्' 'नाना' इत्यादावतिव्याप्तिरिति 'भ्वादिगणपठितत्वम्' उक्तम् ।। ९ ।।

तावन्मात्रोक्तौ चाऽह-

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः।
नहि तत्पाठमात्रेण युक्तमित्याकरे स्पुटम् ।। १० ।।

गणपठितत्वमात्रोक्तौ सर्वनामाव्ययानामपि धातुत्वं स्यात्। तथाच- 'याः पश्यसि' इत्यादौ " आतो धातोः" (पा० सू० 6-4-240) इत्याकारलोपापत्तिः। ननु लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणम्, तस्य लाक्षणिकत्वादित्यत आह-वेत्यादि।

अव्यये=`वा' इत्यादावतिप्रसङ्गः तादृशस्यैव गणे पाठेन निर्णयासम्भवात्। तथाच विकल्पार्थकः 'वाति'इति प्रयोगः स्यादिति भावः। न च गतिगन्धनाद्यर्थनिर्देशो नियामकः, तस्य "अर्थानादेशनात्" इति भाष्यपर्य्यालोचनया आधुनिकत्वलाभात् ।। १० ।।

क्रिया नाम धात्वर्थः इति चेद् अन्योन्याश्रयः

नन्वस्तु 'क्रियावाचकत्वे सति गणपठितत्वं धातुत्वम्', क्रिया च धात्वर्थ एव, न व्यापार इत्याशङ्कां समाधत्ते-

धात्वर्थत्वं क्रियात्वञ्चेद्धातुत्वं च क्रियार्थता।
अन्योऽन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाऽऽकरम् ।। ११ ।।

यदि क्रियात्वं धात्वर्थत्वमेव तर्हि धातुत्वग्रहे तदर्थत्वरूपक्रियात्वग्रहः, क्रियात्वग्रहे च तदवच्छिन्नवाचकत्वघटितधातुत्वग्रह इत्यन्योन्याश्रय इति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुते चान्योन्याश्रयस्योत्पत्तौ ज्ञप्तौ वा प्रतिबन्धकत्वाभ्युपगमेनासङ्गत्यापत्तेः।

न च 'अन्यतमत्वं धातुत्वम्', "भूवादयः" इत्यस्य वैयर्थ्यापत्तेरित्यभिप्रेत्याह-अस्त्विति। व्यापारसन्तानः क्रिया, तद्वाचकत्वे सति गणपठितत्वमित्यर्थः। ननु सत्तादीन् फलांशानन्यतमत्वेनादाय तद्वाचकत्वे सति सणपठितत्वं लक्षणमुच्यताम्। धात्वर्थत्वात् तेषां क्रियाशब्देन व्यवहारो भाष्यादौ कृतोऽप्युपपत्स्यत इति चेन्न, अन्यतममध्ये विकल्पस्यापि 'विकल्पयति'इति प्रयोगानुसारात् प्रवेशावश्यकत्वेन तदर्थके 'वा' इत्यव्यये उक्तरीत्या गणपठितत्वसत्त्वेनाऽतिव्याप्तेरिति ।। ११ ।।

अस्त्यादावपि क्रियाप्रतीतिप्रतिपादनम्

नन्वस्यैव धातुत्वे 'अस्ति' इत्यादौ क्रियाप्रतीत्यभावादस्त्यादीनां तदवाचकानामधातुत्वप्रसङ्ग इत्यत आह-

अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ।। १२ ।।

अस्त्यादौ=`अस् भुवि' इत्यादौ, धर्म्यंशे=धर्म्मिभागे, भाव्ये=भाव्यत्वेन विवक्षिते, अस्त्येव=प्रतीयत एव। अयमर्थः-'स ततो गतो न वा' इति प्रश्ने, महता यत्नेन'अस्ति' इति प्रयोगे सत्तारूपफलानुकूला भावना प्रतीयत एव।

उत्पत्त्यादिबोधने तु सुतराम्। रोहितो लोहितादासीद् धुन्धुस्तस्य सुतोऽभवत्। (रामायणम्)। इत्यादिदर्शनात्।

किञ्च, अत्र भावनाविरहे लडादिव्यवस्था न स्यात्, तस्या एव वर्त्तमानत्वादिविवक्षायां तद्विधानात्।

"क्रियाभेदाय कालस्तु सङ्खया सर्वस्य भेदिका" इति वाक्यपदीयादिति।

नन्वेवम् अस्ति इत्यत्र स्पष्टं कुतो न बुद्ध्यत इत्यत आह-अन्यत्रेति।

अशेषभावात्=भावनायाः फलसमानाधिकरणत्वात्। तथाच भावनायाः फलसामानाधिकरण्यं तत्स्पष्टत्वे दोष इति भावः।

नन्वेवम् 'किं करोति' इति प्रश्ने, 'पचति' इत्युत्तरस्येव 'अस्ती'त्युत्तरमपि स्यादिति चेत्, इष्टापत्तेः, आसन्नविनाशं कञ्चिदुद्दिश्य 'किं करोति' इति प्रश्रे, पचतीत्युत्तरस्येव, 'अस्ति' इत्युत्तरस्य सर्वसम्मतत्वात्। इतरत्र तु सुस्थतया निश्चिते 'किं करोति' इति प्रश्नः, पाकादिविशेषगोचर एवेत्यवधारणात् 'अस्ति' इति नोत्तरमिति ।। १२ ।।

धातोः फलव्यापारोभयवाचकत्वे सर्वस्य सकर्मकत्वापत्तिशङ्कापरिहारौ

नन्वेवं भावनायाः फलनियतत्वात्, पलाश्रयस्य च कर्मत्वात्, सर्वेषां क्रियावाचकत्वे सकर्म्मकतापत्तिरित्यत आह-

धातोः अकर्मकत्व-सकर्मकत्वनिर्वचनम्

फलव्यापारयोरेकनिष्ठतायामकर्म्मकः।
धातुस्तयोर्धर्म्मिभेदे सकर्म्मक उदाहृतः ।। १३ ।।

एकनिष्ठतायाम्=एकमात्रनिष्ठतायां भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादौ फलस्य कर्त्तृनिष्ठत्वेऽपि नातिव्याप्तिः। अकर्म्मको यथा-भ्वादिः। तयोः= फलव्यापारयोः आश्रयभेदे सकर्मक इत्यर्थः। उक्तञ्च वाक्यपदीये-

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते।
अन्तर्भावाच्च तेनासौ कर्म्मणा न सकर्म्मकः।। इति ।

बिभ्रदिति-तेन स्वधारणानुकूलो व्यापारोऽत्रापि गम्यत इति भावः। तेन=कर्म्मणा सकर्म्मकत्वन्तु न, अन्तर्भावात्=फलांशेन सामानाधिकरण्यसत्त्वादित्यर्थः। 'आत्मानं जानाति' 'इच्छति' इत्यादौ च द्वावात्मनौ=शरीरात्मा, अन्तरात्मा च। तत्रान्तरात्मा तत्कर्म्म करोति येन शरीरात्मा सुखदुःखे अनुभवतीति "कर्म्मवत्कर्मणा" (पा० सू० 3-1-87) इति सूत्रीयभाष्योक्तरीत्या भिन्नाधिकरणनिष्ठतामादाय सकर्म्मकत्व-मित्यवधेयम् ।। १३ ।।

"पाक" इत्यादिभावकृदन्ते प्रकृतिप्रत्ययभागाभ्यां क्रियायाः साध्यसिद्धावस्थयोः प्रतीत्युपपादनम्

नन्वसत्त्वभूतक्रियाया धात्वर्थत्वे 'पाकः' इत्यत्रापि तत्प्रत्ययापत्तिः। नचेष्टापत्तिः, " कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यविरोधादित्यत आह-

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।

प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः ।। १४ ।।

आख्यातशब्दे=`पश्य मृगो धावति' इत्यादौ, भागाभ्यम्=तिङन्ताभ्याम्, प्रकृतिप्रत्ययभागाभ्यामिति विवरणकारोक्तमपव्याख्यानम्, पचतीत्यत्राऽपि भागद्वयसत्त्वात्। साध्यसाधनरूपता यथाक्रमं ग्राह्या। साध्यत्वम्-क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वम्। साधनत्त्वम्-कारकत्वेनान्वयित्वम्। स घञादिष्वपीति-प्रकृत्या साध्यावस्था, प्रत्ययेन साधनावस्था। इयान् परं विशेषः-घञाद्युपस्थाप्या लिङ्गसङ्ख्यान्वयिनी, कारकान्वयिनी च। आख्यातान्तोपात्ता तु नैवम्। तथापि कारकत्वेनान्वयित्वमात्रेण दृष्टान्तदार्ष्टान्तिकतेत्यवधेयम्।

घञाद्यन्ते धातुना साध्यक्रियायाः अभिधाने प्रमाणम्

नच घञन्ते धातुना तथाभिधाने मानाभावः, ओदनस्य पाकः' इति कर्म्मषष्ठया मानत्वात्। नचाध्याहृततिङन्तक्रियान्वयात् षष्ठी, "कर्तृकर्म्मणोः कृति" (पा० सू० 2-3-64) इति कृदन्तेन योग एव तद्विधानात्, "न लोकाव्ययनिष्ठाखलर्थतृनाम्" (पा० सू० 2-3-69) इति लादेशयोगे षष्ठीनिषेधाच्च। एवंरीत्या 'काष्ठैः पाकः' इत्याद्यपीष्टमेव।

घञाद्यन्ते धातुना साध्यरूपफलस्यैव अभिधाने प्रमाणम्

एवं फलांशोऽपि धातुना असत्त्वावस्थापन्न एवोच्यते।

अत एव 'स्तोकं पचति' इतिवत् 'स्तोकं पाकः' इत्युपपद्यते इति ।। १४ ।।

एतदेव स्पष्टयति-

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।

सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ।। १५ ।।

घञादिभिः सिद्धत्वेनाभिधाने प्रमाणम्

नच घञादिभिः सिद्धत्वेनाभिधाने मानाभावः, 'पाकः' इत्युक्ते, भवति नष्टो वेत्याद्याकाङ्क्षोत्थापनस्यैव मानत्वात्,धातूपस्थाप्यायां तदसम्भवस्योक्तत्वात्, 'स्तोकः पाकः' इत्यनापत्तेश्च। तस्माद्धात्वर्थान्वये स्तोकादिशब्देभ्यो द्वितीया। घञर्थान्वये प्रथमा, पुँल्लिङ्गता चेति-तत्सिद्धये घञादेः शक्तिरुपेया। एतेन घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनव्योक्तमपास्तम्।

नच घञन्तशक्त्युपस्थाप्यान्वये 'स्तोकः पाकः' इति भवतीति वाच्यम्, घञन्तानुपूर्व्याः शक्ततावच्छेदकत्वे गौरवादनुशासनाच्च घञादेरेव तथा शक्तिकल्पनादिति दिक्।

एवञ्च घञ्शक्तयभिप्रायेण 'कृदभिहितः' इति भाष्यम्, अतो न तद्विरोध इति भावः ।। १५ ।।

कारकाणां भावनान्वयनियमप्रतिपादनम्

संबोधनाद्यष्टकस्य क्रिययैव साधुत्वमिति प्रतिपादनं च

ननु कारकाणां भावनान्वयनियम एव 'पाकः' इत्यत्रापि कर्म्मषष्ठयनुसारेण भावनाया वाच्यत्वं सिद्ध्येत्त। स एव कुत इत्याशङ्कां समाधत्ते-

सम्बोधनान्तं कृत्वोऽर्थाः कारकं प्रथमो वतिः।

धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ।। १६ ।।

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।

साधुत्वमष्टकस्यास्य क्रिययैवावधार्य्यताम्।। १७ ।।

सम्बोधनान्तस्य क्रियायामन्वयः

सम्बोधनान्तस्य क्रियायामन्वयः, 'त्वं ब्रूहि देवदत्त' इत्यादौ निघातानुरोधात्, "समानवाक्ये निघातयुष्मदस्मदादेशाः" इत्यनेन समानवाक्ये एव तन्नियमात्। उक्तञ्च वाक्यपदीये-

सम्बोधनपदं यच्च तत् क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति ।। इति ।।

'पचति भवति देवदत्तः' इत्यादौ तु सूत्रभाष्यादिरीत्यैकवाक्यतासत्त्वात् स्यादेव निघातः, "तिङ्ङतिङः (पा० सू० 7-1-88) इति सूत्रयता तिङन्तानामप्येकवाक्यतास्वीकारात्। 'एकतिङ्वाक्यम्' इति वदतां वार्त्तिककाराणां मते परं न। वस्तुतस्तु 'एकतिङ्विशेष्यकं वाक्यम्' इति तदभिप्रायस्य हेलाराजीयादौ, वैयाकरणभूषणेऽस्माभिश्च प्रतिपादितत्वात्तन्मतेऽपि भवत्येवेत्यवधेयम्।।

कृत्वोऽर्थाः

कृत्वोऽर्थाः, "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्" (पा० सू० 5-4-17) इति क्रियायोगे तत्साधुत्वोक्तेः, क्रियाया अभ्यावृत्तिः=पुनः पुनर्जन्म, तस्मिन् द्योत्ये इति तदर्थात्।

कारकम्

कारकम्, 'कारके' इत्यधिकृत्य तेषां व्युत्पादनात्। कारकशब्दो हि क्रियापरः, करोति कर्तृकर्म्मादिव्यपदेशानिति व्युत्पत्तेः। तथाचाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियाऽर्थककारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्ये स्पष्टम्।

प्रथमो वतिः

प्रथमो वतिः, "तेन लुल्यं क्रिया चेद्वतिः" (पा० सू० 5-1-114) इति विहितः, तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात्।

धातुसंबन्धाधिकारनिष्पन्नम्

धातुसम्बन्धाधिकारे, "धातुसम्बन्धे प्रत्ययाः" (पा० सू० 3-4-1) इत्यधिकृत्य तेषां विधानात्।

असमस्तनञ्

असमस्तनञ्-समासायोग्यः प्रसज्यप्रतिषेधीयो नञित्यर्थः, उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वाद् यथाश्रुतग्रहणायोगात्।

न चासमस्तनञः क्रियान्वये मानाभावः, न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते इत्यादौ क्रियाया एव निषेधप्रतीतेः। अत एव विद्यमानेऽपि घटे तादृशप्रयोगः।

तथा च 'घटो नास्ति' इत्यत्राप्यस्तित्वाभाव एव बोध्यते। नहि घटो न जायते, नास्तीत्यनयोर्धात्वर्थ-भेदमन्तरेणास्ति विशेषः। तथाच 'भूतले न घटः' इत्यत्राप्यस्तीत्यध्याहार्य्यम्, प्रकारतासम्बन्धेन नञर्थ-विशेष्यकबोधे धातुजन्यभावनोपस्थितेर्हेतुत्वस्य क्लृप्तत्वात्। शेषं नञर्थनिर्णये (निरूपणे) वक्ष्यते।। १६ ।।

भावलक्षणसप्तमी

"यस्य च भावेन भावलक्षणम्" (पा० सू० 2-3-37) इत्यत्र भावनार्थकभावशब्देन तद्योगे साधुत्वाख्यानलाभात्।

भावलक्षणषष्ठी

"षष्ठी चानादरे" (पा० सू० 2-3-38) इति तदग्रिमसूत्रेऽपि चकाराद्यस्य च भावेनेत्यायातीत्यर्थः।

साधुत्वमिति-तत्स्वरूपं तु वक्ष्यते।

क्रिययैवेति-अयं भावः-भूवादिसूत्रादिषु प्रायशः क्रियाशब्देन भावनाव्यपदेशात्, तत्र तस्य साङ्केतिकी शक्तिः। फलांशे क्वाचित्कः क्रियत इति यौगिकः प्रयोगः। तथा च संज्ञाशब्दस्यानपेक्ष्य प्रवृत्तत्वेन बलवत्त्वाद् भावनान्वय एव साधुता लभ्यते। अत एव संज्ञाशब्दप्राबल्यात् 'रथन्तरमुत्तराग्रन्थपठितऋक्ष्वेव गेयम्, नतु वेदे तदुत्तरपठ्यमानऋक्षु' इति नवमे निर्णीतम्।

किञ्च फलांशोऽपि भावनायां विशेषणम्, कारकाण्यपि क्वचित्तथाभूतानि, इति "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" (जै० सू० 3-1-22) इति न्यायेन सर्वे सेवका राजानमिव भावनायामेव

परस्परनिरपेक्षाण्यन्वियन्ति। 'नहि भिश्रुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके' इति न्यायेनापि फलं त्यक्त्वा भावनायामेवान्वियन्तीति मीमांसका अपि मन्वते। एवञ्च 'विशेष्यतया कारकादिप्रकारबोधं प्रति धातुजन्यभावनोपस्थितिर्हेतुः' इति कार्य्यकारणभावस्य क्लृप्तत्वात्। यत्रापि 'पक्ता' 'पाचकः' इत्यादौ भावना गुणभूता, तत्रापि क्लृप्तकार्य्यकारणभावानुरोधात् तस्यामेवान्वय इत्यवसीयते, इत्यादि भूषणे प्रपञ्चितम्। केचितु भूतले घटः देवदत्तो घटमित्यादावन्वयबोधाकाङ्क्षनिवृत्त्योरदर्शनान्न तव्द्यतिरेकेण साधुत्वलाभ इत्याहुः ।। १७ ।।

वतेः कारकस्य च क्रियाभिन्ने अन्वयमभ्युपगच्छतां नैयायिकानां खण्डनम्

स्वयमुपपत्तिमाह-

यदि पक्षेऽपि वत्यर्थः कारकञ्च नञादिषु।

अन्वेति त्यज्यतां तर्हि चतुर्थ्याः स्पृहिकल्पना ।। १८ ।।

'पर्वतो वह्निमान्, धूमात्, महानसवत्', भूतले न घटः 'भूतले घटः' इत्यादिपादात्। एवमादिष्वनुशासनविरोधेऽपि यदि साधुत्वमन्वयबोधश्चाभ्युपेयते तर्हि चतुर्थ्याः स्पृहिकल्पनाऽपि त्यज्यतामित्यर्थः। अनुशासनानुरोधतौल्ये अर्द्धजरतीयमयुक्तमिति भावः ।। १८ ।।

कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वयः

एवं कर्त्रादौ विहितानामिन्यादीनां क्रिययैवान्वय इत्याह-

अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः।

क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ।। १९ ।।

न विविच्य ग्रहः=ग्रहणं यस्याः सा अविग्रहा=गुणीभूतेति यावत्। यथा च 'ग्रामं गतः' इत्यत्र क्तप्रत्ययार्थगुणीभूतापि क्रिया ग्रामादिकर्म्मभिः सम्बध्यते, तथा 'कृतपूर्वी कटम्' इत्यत्रापि गुणभूता इन्यादिभिरित्यर्थः।

न च वृत्तिमात्रे समुदायशक्तेर्वक्ष्यमाणत्वात् तत्रान्तर्गता भावना पदार्थैकदेश इति कथं तत्रान्वय इति वाच्यम्, नित्यसापेक्षेष्वेकदेशेऽपि 'देवदत्तस्य गुरुकुलम्', 'चैत्रस्य नप्ता' इत्यादाविवान्वयाभ्युपगमात्। एवं भोक्तुं पाकः, भुक्तवा पाक इत्यत्रापि द्रष्टव्यम् ।। १९ ।।

कृत्वोर्थेषु अतिप्रसङ्गाशङ्का समाधानं च

अतिप्रसङ्गमाशङ्कय समाधत्ते-

कृत्वोऽर्थाः क्तवातुमुन्वत्स्युरिति चेत् सन्ति हि क्वचित्।

अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात् ।। २० ।।

'भोक्तुं पाकः' भुक्तवा पाक इत्यादौ, "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्" (पा० सू० 3-3-10) "समानकर्त्तृकयोः पूर्वकाले" (पा० सू० 3-4-21) इति क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमाना अपि तुमुन्नादयो गुणभूतां तामादाय यथा जायन्ते, तथा कृत्वोऽर्था अपि स्युः। 'एकः पाकः' इत्यत्र, "एकस्य सकृच्च" (पा० सू० 5-4-19) द्वौ पाकौ, त्रयः, चत्वार इत्यत्र "द्वित्रिचतुर्भ्यः सुच्" (पा० सू० 5-4-18)। 'पञ्च' इत्यत्र कृत्वसुच् स्यात्। तथाच 'सकृत् पाकः' द्विस्त्रिश्चतुः पाका इत्याद्यापत्तिरिति चेदिष्टापत्तिः, "द्विर्वचनम्" इत्यादिदर्शनात्।

अतिप्रसङ्गस्त्वनभिधानान्नेत्याह-अतीति। "नहि वचिरन्तिपरः प्रयुज्यते" इत्याद्यभियुक्तोक्तरीत्या समाधेयमिति भावः।

केचित्तु-"सङ्ख्यायाः क्रियाभ्यावृत्तिगणने" इत्यत्र क्रियाग्रहणं व्यर्थम्, तस्या एवाभ्यावृत्तिसम्भवेन सामर्थ्यात्तल्लाभात्। तथाच साध्यमात्रस्वभावक्रियालाभाय तदिति वाच्यम्, नच 'पाकः', इत्यादौ तादृशीति नातिप्रसङ्गः, द्विर्वचनमिति च 'द्विःप्रयोगो द्विर्वचनम्' इति व्युत्पत्त्या, "द्विर्वचनेऽचि" (पा० सू०1-1-59)

इति ज्ञापकं वा आश्रित्योपपादनीयमित्याहुः ।। २० ।।

शक्तत्व-साधुत्वयोः व्याप्य-व्यापकभावाभावप्रतिपादनम्

ननु सिद्धान्ते बोधकतारूपा शक्तिराख्यातशक्तिग्रहवतां बोधादावश्यकी, इति धातोरेव भावना वाच्या, नाऽऽख्यातस्येति कथं निर्णय इत्याशङ्कां समाधत्ते-

भेद्यभेदकसम्बन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्य्यते ।। २१ ।।

भेद्यम्=विशेष्यम्, भेदकम्=विशेषणं तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वम्। अयमर्थः-व्याकरणस्मृतिः शब्दसाधुत्वपरा तत्रैवावच्छेदकतया कल्प्यमानधर्म्मस्य शक्तित्वं वदतां मीमांसकानां पुनः शक्तत्वं साधुत्वमित्येकमेवेति तद्रीत्या विचारे साधुत्वनिर्णये एव शक्तिनिर्णय उच्यते।

अतिरिक्तशक्तिवादेऽप्याख्यातानामसाधुता भावनायां स्यादेव। एवञ्च चतुर्थ्यर्थे तृतीयाप्रयोगवद्धात्वर्थभावनायामाख्यातप्रयोगे, याज्ञे कर्मण्यसाधुशब्दप्रयोगात् 'नानृतं वदेत्' इति निषेधोल्लङ्घनप्रयुक्तं प्रायश्चित्तं दर्शनान्तरीयव्युत्पत्तिमतां स्यादेवेति।

ननु त्वन्मते 'नानृतम्' इति निषेधः क्रत्वर्थ एव न सिद्ध्येत्, आख्यातेन कर्त्तुरुक्तत्वाच्छ्रुत्या पुरुषार्थतैव स्यात्, प्रकारणाद्धि क्रत्वर्थता, तच्च श्रुतिविरोधे बाध्यते, इति चेन्न, 'तिङर्थस्तु विशेषणम्' इत्यनेन परिहृतत्वात्। नहि गुणभूतः कर्ता निषेधं स्वाङ्गत्वेन ग्रहीतुमलम्। भावना तु प्रधानं तं ग्रहीतुं समर्थेति प्रकारणात् क्रत्वर्थतैव। अस्तु वा क्रतुयुक्तपुरुषधर्मः, अनुष्ठाने विशेषाभावात्। "जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति वाक्योक्तमन्त्रविधिवदित्यादि भूषणे प्रपञ्चितम्।

नन्वाख्यातस्य भावनायामसाधुत्वे ततस्तब्दोधो न स्यात्, साधुत्वज्ञानस्य शाब्दबोधहेतुत्वात्, इत्यत आह-बोध इति-असाधुत्वेऽपि साधुत्वभ्रमाद् बोधोऽस्तु नाम, अपभ्रंशवत्। असाधुत्वन्तु स्यादेवेति भावः।

वस्तुतः साधुत्वज्ञानं न हेतुः, तद्व्यतिरेकनिर्णयोऽपि न प्रतिबन्धक इति 'असाधुरनुमानेन' इत्यत्र वक्ष्यामः ।। २१ ।।

रङ्गोजिभट्टपुत्रेण कौण्डभट्टेन निर्म्मिते।
पूर्णो भूषणसारेऽस्मिन् धात्वाख्यातार्थनिर्णयः ।। १ ।।

इति श्रीकोण्डभट्टविरचिते वैयाकरणभूषणसारे धात्वर्थाऽऽख्यातसामान्यार्थयोर्निरूपणम् ।। १ ।।

****

।। अथ लकरार्थनिर्णयः ।।

टितामर्थविवरणम्

प्रत्येकं दशलकाराणामर्थं निरूपयति-

वर्त्तमाने परोऽक्षे श्वो भाविन्यर्थे भविष्यति।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः ।। २२ ।।

लडादयष्टितः षट् क्रमेणैष्वर्थेषु द्रष्टव्याः।

लडर्थनिरूपणम्

तथाहि-वर्त्तमानेऽर्थे लट् "वर्त्तमाने लट्" (पा० सू० 3-1-183) इति सूत्रात्। प्रारब्धापरिसमाप्तत्वम्, भूतभविष्यद्भिन्नत्वं वा वर्त्तमानत्वम्। 'पचति' इत्यादावधिश्रयणाद्यधःश्रयणान्ते मध्ये तदस्तीति भवति लट्प्रयोगः।

आत्मास्तीत्यादौ वर्तमानतानिरूपणम्

आत्माऽस्ति पर्वताः सन्तीयादौ तत्तत्कालिकानां राज्ञां क्रियाया अनित्यत्वात्तद्विशिष्टस्योत्पत्त्यादिक-मादाय वर्त्तमानत्वमूह्यम्। उक्तं हि भाष्ये-"इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकारणम्" इति,

परतो भिद्यते सर्वमात्मा तु न विकम्पते।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते।।

इति वाक्यपदीये च। एवम्, "तम आसीत्" "तुच्छेनाभ्यपिहितं यदासीत्" "अहमेकः प्रथममासम्, वर्त्तामि च, भविष्यामि च" इत्यादिश्रुतयोऽपि योज्याः।

वर्तमानत्वस्य द्योत्यत्वं वाच्यत्वं वा

तच्च वर्त्तमानत्वादि लडादिभिर्द्योत्यते, क्रियासामान्यवाचकस्य तद्विशिष्टे लक्षणायां लडादेस्तात्पर्य्य-ग्राहकत्वेनोपयोगात्। अन्वयव्यतिरेकाभ्यां तद्रूपं लडादिवाच्यमेव। अन्यथा प्रत्ययानां वाचकत्वविलोपापत्ति-रित्यपि पक्षान्तरम्।

लिडर्थः

लिडर्थमाह-परोक्षे इति-"परोक्षे लिट्" (पा० सू० 3-2-115) इति सूत्रात्। कालस्तावदद्यतनानद्यतनभेदेन द्विविधः। द्विविधोऽपि भूतभविष्यद्रूपः। तत्रानद्यतने भूते परोक्षे लिडित्यर्थः। तेनाद्यतने भूते, अनद्यतने भविष्यति, भूतेऽप्यपरोक्षे च न लिट्प्रयोगः। परोक्षत्वञ्च 'साक्षात्करोमि' इत्येतादृशविषयता-शालिज्ञानाविषयत्वम्।

परोक्षे इत्यस्य अव्यावर्तकत्वशङ्का-तन्निरासः

नच "क्रिया नामेयमत्यन्तापर(रि)दृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति भाष्यात् तस्या अतीन्द्रियत्वेन 'परोक्षे' इत्यव्यावर्त्तकमिति शङ्क्यम्, पिण्डीभूताया निदर्शयितुमशक्यत्वेऽप्य-वयवशः 'साक्षात्करोमि' इति प्रतीतिविषयत्वसम्भवात्। अन्यथा 'पश्य मृगो धावति' इत्यत्र तस्या दर्शनकर्मता न स्यादिति प्रतिभाति।

व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमतो नोक्तदोषः। 'अयं पपाच' इत्याद्यनुरोधाद् व्यापाराविष्टानामित्यपि वदन्ति।

स्वक्रियायाः स्वपारोक्ष्याभावशङ्का-तत्समाधानम् च

कथं तर्हि "व्यातेने किरणावलीमुदयनः" इति, स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत्, असङ्गतमेव, व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि (बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्द-

रचनात्मके ग्रन्थे) अनद्यतनत्वातीतत्वयोर्विस्तारक्रियायामसत्त्वेन अनद्यतनातीत्वयोरभावेन तदर्थकलिङ-सम्भवात्।

लुडर्थः

लुडर्थमाह-श्वो भाविनीति। अनद्यतने भाविनीत्यर्थः, "अनद्यतने लुट्" (पा० सू० 3-3-15) इति सूत्रात्। यथा "श्वो भविता" इत्यादौ।

लृडर्थः

लृडर्थमाह-भविष्यतीति। भविष्यत्सामान्ये इत्यर्थः, "लृट् शेषे च" (पा० सू० 3-3-13) इति सूत्रात्। यथा "घटो भविष्यति" इत्यादौ। तत्त्वञ्च-वर्त्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्।

लेडर्थमाह-विध्यादाविति, "लिङर्थे लेट्" (पा० सू० 3-4-7) इति सूत्रात्। लिङर्थश्च विध्यादिरिति वक्ष्यते।

लोडर्थः

लोडर्थमाह-प्रार्थनेति। आदिना विध्याद्याशिषो गृह्यन्ते, "आशिषि लिङ्लोटौ" (पा० सू० 3-3-173) "लोट् च" (पा० सू० 3-3-162) इति सूत्राभ्यां तथाऽवगमात्। यथा-'भवतु ते शिवप्रसादः' इत्यादौ। एतयोरर्थो लिङर्थ एव, त्रयाणां समानार्थत्वादिति तन्निर्णयेनैव निर्णयः ।। २२ ।।

लङादीनामर्थः

लङादिक्रमेण ङितामर्थमाह-

ह्यो भूते प्रेरणादौ च भृतमात्रे लङादयः।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः ।। २३ ।।

लङर्थः

लङर्थमाह-ह्यो भूत इति। अनद्यतने भूत इत्यर्थः, "अनद्यतने लङ्" (पा० सू० 3-1-111) इति सूत्रात्। यथा-'अस्य पुत्रोऽभवत्' इत्यादि।

लिङर्थः

लिङर्थमाह-प्रेरणादाविति, "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" (पा० सू० 3-3-161) इति सूत्रात्। तत्र विधिः=प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्त्तनम्। निमन्त्रणम्=नियोगकरणम्,आवश्यके (श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्) प्रेरणेत्यर्थः। आमन्त्रणम्=कामचारानुज्ञा। अधीष्टम्=सत्कारपूर्वको व्यापारः। सम्प्रश्नः=सम्प्रधारणम्।

एवञ्चतुष्टयानुगतप्रवर्त्तनात्वेन वाच्यता, लाघवात्। उक्तञ्च--

अस्ति प्रवर्त्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया।।
न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।
विद्ध्यादीनामुपादानं चतुर्णामादितः कृतम्।। इति।

प्रवर्त्तनात्वञ्च-प्रवृत्तिजनकज्ञानविषयताऽवच्छेदकत्वम्।

तच्चेष्टसाधनत्वस्यास्तीति तदेव विध्यर्थः।

कृतिसाध्यतादीनाम् लिङर्थतानिराकरणम्

यद्यप्येतत् कृतिसाध्यत्वस्यापि अस्ति, तज्ज्ञानस्यापि प्रवर्त्तकत्वात्, तथाऽपि यागादौ सर्वत्र तल्लोकत एव लभ्यत इत्यन्यलभ्यत्वान्न तच्छक्यम्।

बलवदनिष्टाननुबन्धित्वज्ञानञ्च न हेतुः, द्वेषाभावेनान्यथासिद्धत्वात्, आस्तिककामुकस्य नरकसाधनता-ज्ञानदशायामप्युत्कटेच्छया द्वेषाभावदशायां प्रवृत्तेर्व्यभिचाराच्च। तस्मादिष्टसाधनत्वमेव प्रवर्त्तना। उक्तञ्च

मण्डनमिश्रैः-

पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः।
प्रवृत्तिहेतुं धर्म्मञ्च प्रवदन्ति प्रवर्त्तनाम् ।। इति।

प्रपञ्चितं चैतद् वैयाकरणभूषणे।

आदिना "हेतुहेतुमतोर्लिङ्" (पा० सू० 3-3-156) "आशिषि लिङ्लोटौ" (पा० सू० 3-3-173) इति सूत्रोक्ता हेतुहेतुमद्भावादयो गृह्यन्ते। "यो ब्राह्मणायावगुरेत्तं शतेन यातयेत्" इति यथा।

लुङर्थः

लुङर्थमाह-भूतमात्र इति-भूतसामान्ये इत्यर्थः, भूते लुङ् (भूते इत्यधिकृत्य "लुङ्" (पा० सू० 3-2-110)) इति सूत्रात्। अत्र 'विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्'। तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटोऽभूदिति प्रयोगः। विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयक उत्पत्त्याद्यनुकूलो व्यापार इति बोधः।

कालविभागः

अयमत्र संग्रहः-कालो द्विविधः, अद्यतनोऽनद्यतनश्च। आद्यस्त्रिविधः, भूतभविष्यद्वर्त्तमानभेदात्। अन्त्यो द्विविधः-भूतो भविष्य(ष्यँ)श्च। तत्र वर्त्तमानत्वे लट्। भूतत्वमात्रे लुङ्। भविष्यत्तामात्रे लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायामावयोर्लृङ्। अनद्यतने भूतत्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षायां लिट्। तत्सदृशे भविष्यति लुट्, इति द्रष्टव्यः।

लृङर्थः

लृङर्थमाह-सत्यामिति-क्रियाया अतिपत्तिः=अनिष्पत्तिस्तस्यां गम्यमानायाम्, भूते भाविनि हेतुहेतुमद्भावे सति लृङित्यर्थः। "लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ" (पा० सू० 3-3-138) इति सूत्रात्। लिङो निमित्तं हेतुहेतुमद्भावादि। यथा-'सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्'। 'वह्निश्चेत् प्राज्वलिष्यद् ओदनमपक्ष्यत्' इत्यादौ। अत्र वह्नयभिन्नाऽऽश्रयकप्रज्वलनानुकूलव्यापाराभावप्रयोज्य - ओदनाभिन्नाश्रयकविक्लित्त्यनुकूल-व्यापाराभाव इति शाब्दबोधः। एवंरीत्या द्रष्टव्यम्।

अयञ्च अर्थनिर्देश उपलक्षणम्, अर्थान्तरेऽपि बहुशो विधानदर्शनात्। प्रसिद्धत्वादेष्वेवार्थेषु शक्तिरन्यत्र लक्षणेति मतान्तररीत्या वोक्तम्। एतेषां क्रमनियामकश्चानुबन्धक्रम एव। अत एव पञ्चमो लकार इत्यनेन मीमांसकैर्लेट् व्यवह्रियत इति दिक् ।। २३ ।।

इति वैयाकरणभूषणसारे लकारविशेषार्थनिरूपणं समाप्तम् ।। २ ।।

****

।। अथ नामार्थनिर्णयः ।।

नामार्थविषयकविविधपक्षोपस्थापनम्

नामार्थमाह--

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ।। २५ ।।

एकं नामार्थः

जातिः नामार्थः

एकम्=जातिः, लाघवेन तस्या एव वाच्यत्वौचित्यात्, अनेकव्यक्तीनां वाच्यत्वे गौरवात्।

नच व्याक्तीनामपि प्रत्येकमेकत्वाद्विनिगमनाविरहः, एवं हि एकस्यामेव व्यक्तौ शक्त्यभ्युपगमे व्यक्त्यन्तरे लक्षणायां स्वसमवेताश्रयत्वं संसर्ग इति गौरवम्,जात्या तु सहाश्रयत्वमेव संसर्ग इति लाघवम्।

किञ्चैवं विशिष्टवाच्यत्वमपेक्ष्य नागृहीतविशेषणन्यायाज्जातिरेव वाच्येति युक्तम्, व्यक्तिबोधस्तु लक्षणया। एवञ्च तत्र विभक्त्यर्थान्वयोऽप्युपपद्यते इति दिक्।

व्यक्तिः नामार्थः

यद्वा, केवलव्यक्तिरेव एकशब्दार्थः, केवलव्यक्तिपक्षे एवाण्ग्रहणस्य, एकशेषस्य चारम्भेण तस्यापि शास्त्रसिद्धत्वात्। युक्तञ्चैतत्-व्यवहारेण व्यक्तावेव तद्ग्रहणात्। सम्बन्धितावच्छेदकस्य (सम्बन्धितावच्छेदिकायाः) जातेरैक्याच्छक्तिरप्येकैवेति न गौरवमपि।

नचैवं घटत्वमपि वाच्यं स्यात्, शक्यतावच्छेदकत्वात्, तथाच 'नागृहीतविशेषण'न्यायात् तदेव वाच्यमस्त्विति शङ्कयम्, अकारणत्वेऽपि कारणतावच्छेदकत्ववत्, अलक्ष्येऽपि लक्ष्यतावच्छेदकत्ववत्तथात्रापि सम्भवात्। उक्तञ्च--

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो नच व्यभिचरिष्यति ।। इति ।

भाष्यकाराशयः,

द्विकं नामार्थः

वस्तुतस्तु "नह्याकृतिपदार्थतस्य द्रव्यं न पदार्थः" इति।
भाष्याद् विशिष्टं वाच्यम्।

'एकम्' इत्यस्य चायमभिप्रायः-शक्तिज्ञाने च विषयतयाऽवच्छेदिका जातिरेकैव। तथाच घटत्वविशिष्टबोधे घटत्वांशेऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुतेति कार्यकारणभाव इत्यादि प्रपञ्चितं भूषणे।

तदेतदभिप्रेत्याह-द्विकमिति-जाति-व्यक्ती इत्यर्थः। पूर्वपक्षाद् विरोधपरिहारः पूर्ववत्।

त्रिकमिति-जाति-व्यक्ति-लिङ्गानीत्यर्थः।

शब्दशास्त्रीयं लिङ्गम्-तस्य शब्दनिष्ठत्वं च

सत्त्वरजस्तमोगुणानां साम्यावस्था नपुंसकत्वम्। आधिक्यं पुंस्त्वम्। अपचयः स्त्रीत्वम्। तत्तच्छब्दनिष्ठं तत्तच्छब्दवाच्यञ्च, तमेव विरुद्धधर्ममादाय तटादिशब्दा भिद्यन्ते।

केषाञ्चिदनेकलिङ्गत्वव्यावहारस्तु समानानुपूर्वीकत्वेन शब्दानामभेदारोपात्।

एवञ्च पदार्थपदे पुँस्त्वमेव। व्यक्तिपदे स्त्रीत्वमेव। वस्तुपदे नपुंसकत्वमेव इति सर्वत्रैव 'अयं पदार्थः' 'इयं व्यक्तिः' 'इदं वस्तु' इति व्यवहारः,'तटः' 'तटी' 'तटम्' इति चोपपद्यते।

लिङ्गस्य अर्थपरिच्छेदकत्वेन अन्वयः

तच्च लिङ्गमर्थपरिच्छेदकत्वेन अन्वेति, इति पश्वादिशब्दोक्तम्-'पशुः स्त्रियां नास्ति' इति, 'पशुना' इत्यादिविधिर्न छाग्यादीनङ्गत्वेन प्रयोजयतीति विभावनीयम्। नच व्यक्त्यादिशब्दोक्तलिङ्गस्येव पश्वादिशब्दोक्तस्यापि साधारण्यं शङ्क्यम्, व्यक्तिशब्दस्य नित्यस्त्रीलिङ्गत्वेन तथा सम्भवेऽपि पशुशब्दस्य नित्यपुंल्लिङ्गत्वे प्रमाणाभावात्।

'पश्वा न तायुं गुहा चरन्तम्' (ऋ० वे० म० 1 अनु० 12 सू० 65)।

"पश्वे नृभ्यो यथा गवे" (ऋ० वे० अ० 1 अ० 3 व० 26) इत्यादि वेदे दर्शनाच्च, मीमांसायां चतुर्थे "पशुना यजेत' इत्यत्रैकत्व-पुँस्त्वयोर्विवक्षितत्वान्नानेकपशुभिः, पशुस्त्रिया वा याग इति प्रतिपादितत्वाच्च।

वस्तुतस्तु विशेषविध्यभावे उप्रत्ययान्तानां पुँस्त्वस्य व्याकरणेन निर्णितत्वाद् वेदभाष्येऽपि जसादिषु छन्दसि वा वचनम्' इति नाभावाभाव इत्युक्तेः पशुशब्दस्य नित्यपुँस्त्वनिर्णयात्। प्रकृते "छागो वा मन्त्रवर्णात्" इति न्यायेनैव निर्णयः। मन्त्रवर्णे हि 'छागस्य वपाया मेदसः' इति श्रूयते। तत्र छागस्येति छाग्यामसम्भावितम्, इति भवति ततः पुंस्त्वनिर्णय इति विस्तरेण प्रपञ्चितं भूषणे।

चतुष्कं प्रातिपदिकार्थः

चतुष्कम्-सङ्खयासहितं त्रिकमित्यर्थः।

पञ्चकं प्रातिपदिकार्थः

पञ्चकम्-कारकसहितं चतुष्कमित्यर्थः।

नन्वन्वय-व्यतिरेकाभ्यां प्रत्ययस्यैव तद्वाच्यम्, तत एव लिङ्गादीनामुपस्थितौ प्रकृतिवाच्यत्वे मानाभावाच्चेति चेत्, सत्यम्, प्रत्ययवर्जिते 'दधि पश्य' इत्यादौ प्रत्ययमजानतोऽपि बोधात् प्रकृतेरेव वाचकत्वं कल्प्यते, लिङ्गानुशासनस्य प्रकृतेरेव दर्शनाच्च।

अत एवैषु पक्षेषु न निर्बन्धः (प्रत्ययस्यौव वाचकताया युक्तत्वात्)।

'द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः'।

इति वाक्यपदीयेऽपि पक्षद्वयस्य व्युत्पादनात्।

शास्त्र इति-बहुषु स्थलेषु व्युत्पादनं व्यञ्जयितुम्, प्राधान्येन तु सरूपसूत्रादौ व्यक्तम् ।। २५ ।।

षट्कं प्रातिपदिकार्थः-शब्दोपि प्रातिपदिकार्थः

शब्दस्तावच्छाब्दबोधे भासते,

> न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
> अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।

इत्याद्यभियुक्तोक्तेः।

'विष्णुमुच्चारय' इत्यादावर्थोच्चारणासम्भवेन, विना शब्दविषयं शाब्दबोधासङ्गतिश्चेति सोऽपि प्रातिपदिकार्थः।

नच लक्षणया निर्वाहः, निरूढलक्षणायाः शक्त्यनतिरेकात्, 'जबगडदशमुच्चारय' इत्यादौ शक्याग्रहेण शक्यसम्बन्धरूपलक्षणाया अग्रहाच्च।

अज्ञातायाश्च वृत्तेरनुपयोगात्, ' गावमुच्चारय' इति भाषाशब्दानामनुकरणे साधुतासम्प्रतिपत्तेः, तेषां शक्त्यभावेन परनये लक्षणाया असम्भवाच्चेत्यभिप्रेत्य षोढाऽपि क्वचित् प्रातिपदिकार्थ इत्याह-

> शब्दोऽपि यदि भेदेन विवक्षा स्यात् तदा तथा।
> नोचेच्छ्रोत्रादिभिः सिद्धोऽप्यसावर्थो व भासते ।। २६ ।।

यद्यनुकार्यानुकरणयोर्भेदविवक्षा तदा शब्दोऽपि प्रातिपदिकार्थः। यदि न भेदविवक्षा, तदा श्रोत्रादिभिरुपस्थितोऽप्यर्थवद् भासते। अपिर्हेतौ, उपस्थितत्वाद्भासते इत्यर्थः। अयं

भावः-अनुकार्यानुकरणयोर्भेदेऽनुकार्यस्य पदानुपस्थिततत्वात्, तत्सिद्धये शक्तिरुपेया, अभेदे प्रत्यक्षे विषयस्य हेतुत्वात् स्वप्रत्यक्षरूपां पदजन्योपस्थितिमादाय शाब्दबोधविषयतोपपत्तिरिति।

यद्यप्यतिप्रसङ्गवारणाय वृत्तिजन्यपदोपस्थितिरेव हेतुः, तथाप्यत्राश्रयतया वृत्तिमत्त्वस्य सत्त्वान्नानुपपत्तिः। निरूपकताऽऽश्रयताऽन्यतरसम्बन्धेन वृत्तिमत एव शाब्दबोधविषयत्वं कल्प्यते इत्यनवद्यम्, सम्बन्धस्योभयनिरूप्यत्वात्, पदादर्थस्येव तद्बोधकत्वेन स्वस्यापि ज्ञानसम्भवाच्चेति।

उक्तञ्च वाक्यपदीये--

ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते।। इति,

विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यते। इति चेति।

अनुकार्यानुकरणयोरभेदः

प्रसङ्गादनुकार्य्यानुकरणयोरभेदपक्षे साधकमाह-

अत एव गावित्याह भू सत्तायामितीदृशम्।
न प्रातिपदिकं नापि पदं साधु तु तत् स्मृतम् ।। २७ ।।

'गवित्ययमाह' 'भू सत्तायाम्' इत्येवमादयो यतोऽनुकरणशब्दा अनुकार्य्यान्न भिद्यन्ते। अतस्तेषामर्थवत्त्वाभावात् ' अर्थवदधातुः' (पा० सू० 1-4-42) इत्याद्यप्रवृत्तौ न प्रातिपदिकत्वम्, नापि पदत्वम्, अथ च साधुत्वमित्युपपद्यते। अन्यथा 'प्रत्ययः' (पा० सू० 3-1-1) `परश्च' (पा० सू० 3-1-2) `अपदं न प्रयुञ्जीत' इति निषेधादिलङ्घनादसाधुतापत्तिरित्यर्थः ।। २७ ।।

इति श्रीमद्रङ्गोजिभट्टात्मजकौण्डभट्टकृते वैयाकरणभूषणसारे नामार्थनिर्णयः ।। ४ ।।

****

।। अथ स्फोटनिरूपणम् ।।

वाक्यस्फोटस्यैव मुख्यत्त्वमिति सिद्धान्तः

सिद्धान्तनिष्कर्षमाह-

वाक्यस्फोटोऽतिनिष्कर्षे तिष्ठतीति मतस्थितिः।

यद्यपि वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदवाक्यस्फोटौ, वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकम्, दुरर्थकञ्च, तथाऽपि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम्। एतदेव ध्वनयति-अतिनिष्कर्ष इति- इति मतस्थितिर्वैयाकरणानाम्=महाभाष्यकारादीनाम्।

वर्णस्फोटनिरूपणम्

तत्र क्रमेण सर्वांस्तान् निरूपयन् वर्णस्फोटं प्रथममाह-सादुशब्द इति-साधुशब्दान्तर्गता वाचका नवेति विप्रतिपत्तिः।

साधुशब्दान्तर्गता वाचकाः नतु तैः स्मृताः ।। ६१ ।।

२ विधिकोटिरन्येषाम्, नेति वैयाकरणानाम्। साधुशब्दे 'पचति' 'रामः' इत्यादिप्रयुज्यमानेऽन्तर्गतास्तिब्वि-सर्गादय एव बोधकाः=वाचकाः, तस्यैव शक्तत्वस्य प्राग्व्यवस्थापितत्वात्। नतुतैः स्मृताः लादयः, स्वादयश्चेत्यर्थः । ६१ ।

प्रयोगान्तर्गतानां न वाचकत्वमिति पूर्वपक्षः

ये तु प्रयोगान्तर्गतास्तिब्विसर्गादयो न वाचकाः, तेषां बहुत्वेन शक्तयानन्त्यापत्तेः, 'एधाञ्चक्रे' 'ब्रह्म' इत्यादावादेशलुगादेरभावरूपस्य बोधकत्वासम्भवाच्च। किन्तु तैः स्मृता लकाराः स्वादयश्च वाचकाः, लत्वस्य जातिरूपतया शक्तताऽवच्छेदकत्वौचित्यात्, अव्यभिचाराच्च। आदेशानां भिन्नतया परस्परव्यभिचरितत्वात्। लः कर्मणीत्याद्यनुशासनानुगुण्याच्च। नह्यादेशेष्वर्थवत्ताबोधकमनुशासनमुपलभामहे इत्याहुः।

प्रयोगान्तर्गतानां वाचकत्वसमर्थनम्

तान् स्वसाधकयुक्तिभिर्निराचष्टे-

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा।

किञ्चाऽख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ।। ६२ ।।

कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय।

व्यवस्थानुरोधात् प्रयोगान्तर्गता एव वाचकाः, नतु तैः स्मृता इत्यर्थः। तथाहि-पचतीत्यादौ लकारमविदुषो बोधान्न तस्य वाचकत्वम्। नच तेषां तिङ्क्षु शक्तिभ्रमाद् बोधः, तस्य भ्रमत्वे मानाभावात्, आदेशिनामपि तत्तद्वैयाकरणैः स्वेच्छया भिन्नानामभ्युपगमात्, कः शक्तः को नेति व्यवस्थानापत्तेश्च। सर्वेषां शक्तत्वे गौरवम्, व्यभिचारश्चास्त्येव। आदेशानां प्रयोगान्तर्गततया नियतत्वाद् युक्तं तेषां शक्तत्वम्। तथाचादेशिस्मरणकल्पना नेति लाघवम्।

साधकान्तरमाह-व्यवहृतेरिति ।। व्यवहारस्तावच्छक्तिग्राहकेषु मुख्यः। स च श्रूयमाणतिङादिष्वेवेति ते एव वाचका इत्यर्थः। किञ्च तद्धेतुन्यायत इति--

लकारस्य बोधकत्वे 'भू ल्' इत्यतोऽपि बोधापत्तिः स्यात्। तादृशबोधे भवतीति समभिव्याहारोऽपि कारणमिति चेत्, तर्ह्यावशयकत्वादस्तु तादृशसमभिव्याहारस्यैव वाचकत्वशक्तिः।

अन्यथा लकारस्य वाचकत्वम्, समभिव्याहारस्य कारणत्वञ्चेत्युभयं कल्प्यमिति गौरवं स्यात्। तथाच? तादृशसमभिव्याहृता वर्णावित्यत्र विनिगमनाविरहात् प्रयोगान्तर्गतावर्णा वाचका इति सिद्ध्यतीति भावः।

अपिच लकारस्यैव वाचकत्वे कृत्तिङोः कर्तृभावनावाचकत्वव्यवस्था त्वत्सिद्धान्तसिद्धा न स्यादित्याह-किञ्चेति-आदेशानां वाचकत्वे च तिङ्त्वेन भावनायाम्, शानचादिना कर्त्तरि शक्तिरित्युपपद्यते विभाग इति भावः। नच शानजादौ कृतिर्लकारार्थः, आश्रयः शानजर्थ इत्यस्तु, "कर्त्तरि कृत्" इत्यनुशासनादिति शङ्कयम्, स्थान्यर्थेन निराकाङ्क्षतया शानजादौ कर्तरीत्यस्याप्रवृत्तेः। अन्यथा घञादावपि प्रवर्त्तेत ।। ६२ ।।

सामानाधिकरण्यानुरोधात् शानचः कर्त्रर्थकत्वम् इति शङ्कानिरासः

'देवदत्तः पचमानः' इत्यादिसामानाधिकरण्यानुरोधाच्छानचः कर्ता वाच्यः स्यादित्याशङ्क्याह-

तरबाद्यन्ततिङ्क्ष्वस्ति नामता कृत्स्विव स्फुटा ।। ६३ ।।

नामार्थयोरभेदोऽपि तस्मात्तुल्योऽवधार्य्यताम्।

'पचतितरां मैत्रः' 'पचतिकल्पं मैत्रः' इत्यादिषु नामार्थत्वाभेदान्वययोः सम्भव एवेति कर्तृवाचकता स्यादिति भावः। नच पचतिकल्पमित्यत्र सामानाधिकरण्यानुरोधात् कर्त्तरि लक्षणा, 'पचमानः' इत्यत्राप्यापत्तेरिति।

लः कर्मणीत्यनुशासनञ्च लाघवात् कल्पिते लकारे कर्त्रादिवाचित्वं कल्पितमादायेत्युक्तम् ।। ६३ ।।

इति वर्णस्फोटनिरूपणम्।।

पदस्फोटनिरूपणम्

सखण्डपदस्फोटनिरूपणम्(शक्तं पदमिति पारिभाषिकपदस्फोटनिरूपणम्)

अथादेशा वाचकाश्चेत् पदस्फोटस्ततः स्फुटः ।। ६४ ।।

एवमादेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्ध एवेत्याह-अथेत्यादि। आदेशाः=तिब्विसर्गादयः। अयं भावः-समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिद्ध्यति, प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्, प्रत्येकं वर्णानामर्थवत्त्वे प्रातिपदिकत्वाऽपत्तौ "न लोपः प्रातिपदिकान्तस्य" इत्यादिभिः 'धनम्' 'वनम्' इत्यादौ नलोपाद्यापत्तेश्च।

एतच्च चरमवर्णे एव वाचकत्वशक्तिः, शक्तेर्व्यासज्यवृत्तित्वे मानाभावात्। पूर्वपूर्ववर्णानुभवजन्यसंस्काराश्चरमेणार्थधीजनने सहकारिण इति न तन्मात्रोच्चारणादर्थधीरिति वर्णास्फोटवादिनां मतान्तरस्य दूषणायोक्तम्। रामोऽस्तीति वक्तव्ये राम् इत्यनन्तरं घटिकोत्तरमोकारोच्चारणेऽर्थबोधापत्त्या तादृशानुपूर्व्या एव शक्तताऽवच्छेदकत्वैचित्यादिति दिक् ।। ६४ ।।

अखण्डपदस्फोटनिरूपणम्(सुप्तिङन्तं पदमिति पारिभाषिकपदस्फोटनिरूपणम्)

'सुप्तिङन्तं पदम्' इति पारिभाषिकपदस्य वाचकत्वस्वीकर्त्तॄणां मतमाह-

घटेनेत्यादिषु नहि प्रकृत्यादिभिदा स्थिता।

वस्नसादाविवेहापि सम्प्रमोहो हि दृश्यते ।। ६५ ।।

घटेनेत्यादौ 'घटे' इति प्रकृतिः, 'न' इति प्रत्ययः, 'घट्' इति प्रकृतिः, 'एन' प्रत्यय इति विभागस्य, 'सर्वे सर्वपदादेशाः' इति स्वीकारे विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासम्भवान्न वाचकत्वमित्यर्थः। वैयाकरणैर्विभागः सुज्ञेय इत्यतो दृष्टान्तव्याजेनाह-वस्नसादाविति-'बहुवचनस्य वस्नसौ' इति समुदायस्याऽऽदेशविधानान्नात्र तद्विभागः सम्भवतीत्यर्थः ।। ६५ ।।

सखण्डवाक्यस्फोटनिरूपणम्(सुप्तिङन्तचयरूपवाक्यस्फोटनिरूपणम्)

सुप्तिङन्तचयरूपवाक्यस्यापि तदाह--

हरेऽवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु।
अर्थे विशिष्यसम्बन्धाग्रहणं चेत् समं पदे ।। ६६ ।।
लक्षणादधुना चेत्तत्पदेऽर्थेऽप्यस्तु तत् तथा।

'हरेऽव' विष्णोऽव इत्यादौ पदयोः "एङः पदान्तादति" इत्येकादेशे सति न तद्विभागः सुज्ञानः। तथाच प्रत्येकं पदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात् समुदायेऽप्यावशियकी शक्तिः। एवञ्च प्रकृतिप्रत्ययेषु विशिष्याज्ञायमानेष्वपि समुदायव्युत्पत्त्या बोधात् तत्राप्यावश्यिकैव शक्तिरिति भावः। वस्तुतः पदैः पदार्थबोधवद्वाक्येन वाक्यार्थबोध इति पदार्थशक्तिः पदेष्विव वाक्यार्थशक्तिर्वाक्येऽभ्युपेयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ। अन्यथा 'घटः कर्मत्वमानयनं कृतिः' इत्यादौ तादृशब्युत्पत्तिरहितस्यापि बोधप्रसङ्गः। 'घटमानय' इत्यत्रेव पदार्थानामुपस्थितौ सत्यपि तात्पर्य्यज्ञाने बोधाभावाच्च। तत्रैव घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरं कर्म्मत्ववाचकविभक्तेस्ततो धातोस्तत आख्यातस्य समभिव्याहारः कारणमिति कार्य्यकारणभावज्ञानवतो बोधात्तज्ज्ञानमपि हेतुरिति चेत्तर्हि सिद्धो वाक्यस्फोटः, घटादिपदार्थबोधे बोधकतारूपपदशक्तिज्ञानकार्य्यकारणभावस्येव विशिष्टवाक्यार्थबोधे पदसमभिव्याहाररूप-वाक्यनिष्ठबोधकतारूपवाक्यशक्तिज्ञानस्यापि हेतुत्वकल्पनात्, अर्थोपस्थापकज्ञानविषयशब्दवृत्तिज्ञानकारण-त्वस्यैव शक्तित्वात्।

युक्तञ्चैतत्-विषयतासम्बन्धेन शाब्दबोधमात्रे वृत्तिज्ञानस्य लाघवेन हेतुत्वसिद्धेः। विवेचितञ्चैतद् भूषणे।

वाक्यशक्तिसाधनम्

ननु वाक्यार्थस्यापूर्वत्वात् कथं तत्र शक्तिग्रह इत्याशङ्कयाह-अर्थ इति-वाक्यस्येति शेषः। वाक्यस्य वाक्यार्थे विशिष्य शक्तयग्रहणञ्चेत्तर्हि पदेऽप समम्। पदे एवान्वयांशे शक्तिरिति पक्षेऽपि तद्ग्रहासम्भवस्तुल्य इत्यर्थः। यदि च पदशक्तिः पदार्थांशे ज्ञाता, अन्वयांशे चाज्ञातोपयुज्यत इति कुब्जशक्तिवादस्तदा ममापि वाक्यस्य शक्तितरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्तुल्य इति भावः। ननु वृद्धव्यवहारं पश्यतो मनसा पदार्थवद्वाक्यार्थेऽपि तद्ग्रह इति चेत्, तुल्यमित्याह-लक्षणादिति-लक्ष्यते=तर्क्यतेऽनेनेति लक्षणम्=मनस्तस्मात्। अपिपदं पदपदोत्तरं बोध्यम्। पदेऽपि लक्षणात्तदग्रहश्चेत्तर्ह्यस्तु वाक्येऽपीति शेषः। वस्तुतस्तु समुदितार्थे विशिष्टवाक्यस्यैव प्रथमं तद्ग्रहः। आपापोद्वापाभ्यां परं प्रत्येकं तद्ग्रह इति बोध्यम् ।।६६ ।।

वाक्यशक्तौ मीमांसकादिसम्मतिः

इयमेव मीमांसकानां वेदान्तैकदेशिनाञ्च गतिरित्याह--

सर्वत्रैव हि[च] वाक्यार्थो लक्ष्य एवेति ये विदुः।
भाट्टास्तेऽपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम् ।। ६७ ।।

भाट्टाइति-इति तदनुयायिनां वाचस्पति-कल्पतरुप्रभृतीनामुपलक्षणम्। ननूक्तपक्षद्वयमनुपपन्नम्, उत्पत्ते रभिव्यक्तेर्वैकदाऽसम्भवेन उत्पन्नानामभिव्यक्तानां वर्णसमूहरूपपदज्ञानासम्भवात्। तथाच सुतरां तत्समूहरूपवाक्यज्ञानासम्भव इति चेन्न, उत्तरवर्णप्रत्यक्षसमये तस्मिन्नव्यवहितोत्तरत्वसम्बन्धेनोपस्थितपूर्ववर्णावत्त्वम्, तथा तदुत्तरप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वं तस्मिन् सुग्रहमिति तादृशानुपूर्वोघटितपदत्वस्येव वाक्यत्वस्यापि सुग्रहत्वात् ।। ६७ ।।

अखण्डवाक्यस्फोटनिरूपणम्

इदानीमखण्डपक्षमाह-

पदे न वर्णा विद्यन्ते वर्णोष्ववयवा नच।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ।। ६८ ।।

पदे=पचतीत्यादौ, न वर्णाः, नातो वर्णसमूहः पदमिति शेषः। दृष्टान्तव्याजेनाह-वर्णेष्विति-एकारौकारऋृकारादिवर्णोऽष्ववयवाः प्रतीयमाना अपि यथा नेत्यर्थः। क्वचिदिवेत्येव पाठः। एवं वाक्येऽप्याह-वाक्यादिति। पदानामपि वाक्याद्विवेकः=भेदो नास्तीत्यर्थः।

अयं भावः-वाक्यम्, पदञ्चाखण्डमेव, नतु वर्णसमूहः, अनन्तवर्णकल्पने मानाभावात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगनिष्ठं तत्तद्वर्णजनकतायाः, व्याञ्जकताया वाऽवच्छेदकं वैजात्यमादायैव ककारो गकार इत्यादिप्रतीतिवैलक्षण्यसम्भवात्। स्पष्टं हि भामत्याम्-"तारत्वादि वायुनिष्ठं वर्णोष्वारोप्यते" इत्युक्तं देवताधिकरणे। नचैवं वायुसंयोग एव वाचकोऽपि किं न स्यादिति वाच्यम्, प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात् । तथाच वाचकत्वान्यथानुपपत्त्या तदेवेदं पदम्, 'तदेवेदं वाक्यम्' सोऽयं गकारः, इति प्रतीत्या च स्फोटोऽखण्डः सिद्ध्यति। एतेन गौरित्यादौ गकारौकारविसर्गादिव्यतिरेकेण स्फोटाननुभवाच्छ्रूयमाणवर्णानामेव वाचकत्वमस्तीत्यपास्तम्। तेषां स्फोटातिरिक्तत्वाभावात्।

कैयटखण्डनम्

यत्तु वर्णानां प्रत्येकं वाचकत्वे प्रत्येकादर्थबोधापत्तिः। समुदायस्य तु क्रमवतामाशुतरोत्पन्नानां तथैवाभिव्यक्तानां वा ज्ञानमसम्भाव्यमेव। पूर्वपूर्ववर्णानुभवसंस्कारसहकारेणैकदा समूहालम्बनरूपसकलज्ञान-सम्भवस्तु सरो-रसः, राज-जरा, नदी-दीनादिसाधारण इत्यतिप्रसङ्ग इति स्फोट एवाखण्डो नादाभिव्यङ्ग्यो वाचक इति कैयटः, तत्तुच्छम्, पदज्ञानसम्भवस्योपपादितत्वात्। वर्णानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेत्यादिविकल्पग्रासाच्च।

स्वमतसमर्थनम्

ननु त्वन्मतेऽप्येष दोषः। तत्तद्वर्णोपादकत्वेनाभिमतवायुसंयोगानां प्रत्येकं व्यञ्जकत्वं समुदितानां वेति विकल्पस्य सद्भावादिति चेत्। उच्यते। प्रत्येकमेव संयोगा अभिव्यञ्जकाः, परन्तु केचिद् गत्वेन, केचिदौत्वेन केचिद्विसर्गत्वेनेत्यनेकैः प्रकारैः। अत एव वर्णानां तदतिरेकास्वीकारोऽप्युपपद्यते। एवञ्चा-व्यवहितोत्तरत्वसम्बन्धेन घवत्त्वं टकारे गृह्यते। एतादृशपदज्ञानकारणताया अविवादात्। परन्त्वव्यहितोत्तरत्वं स्वज्ञानाधिकरणक्षणोत्पत्तिकज्ञानविषयत्वं वाच्यम्। अत एव घज्ञानानन्तरटज्ञानविषयत्वरूपानु-पूर्वीत्यादिर्नैयायिकवृद्धानां व्यवहारः। एवञ्च न कश्चिद्दोषः।

परिमलखण्डनम्

एतेन पर्य्यायस्थलेष्वेक एव स्फोटो नाना वा? नाद्यः, घटपदे एव गृहीतशक्तिकस्य कलशादेर्बोधप्रसङ्गात् । नच तत्पर्य्यायाभिव्यक्ते शक्तिग्रहस्तत्पर्य्यायश्रवणेऽर्थधीहेतुरिति वाच्यम्, एवं सति प्रतिपर्य्यायं शक्तिग्रहावश्यम्भावेन तत्तत्पर्य्यायगतशक्तिग्रहहेतुताया उचितत्वात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवात्। अन्यथा तत्पर्य्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वे गौरवात्। न द्वितीयः, अनन्तपदानां तेषां शक्तिकल्पनापेक्षया क्लृप्तवर्णेष्वेव शक्तिकल्पनस्य लघुत्वादिति परिमलोक्तमपास्तम्। पर्य्यायेष्वनेकशक्तिस्वीकारस्य सर्वसिद्धत्वात्, तदवच्छेदकानुपूर्व्याः प्रागुपपादनादिति दिक्।

शब्दकौस्तुभे दीक्षितमतम्

शब्दकौस्तुभे तु वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः। अन्यथा कपालातिरिक्त घटाद्यसिद्धिप्रसङ्गश्चेति प्रतिपादितम् ।। ६८ ।।

अखण्डस्फोटपक्षे शास्त्रप्रामाण्यसमर्थनम्

नन्वेवं शास्त्रस्याप्रामाण्यप्रसङ्गः, पदस्याखण्डत्वात्, शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां

पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते-

पञ्चकोशादिवत्तस्मात् कल्पनैषा समाश्रिता।
उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः ।। ६९ ।।

उपेयप्रतिपत्त्यर्था इत्यन्तेनान्वयः। अयं भावः-यथा भृगुवल्याम् "भृगुर्वै वारुणि र्वरुणं ब्रह्म पृष्टवान्। स उवाच 'अन्नम्' इति, तस्योत्पत्त्यादिकं बुद्ध्वा पृष्टे-प्राणमनोविज्ञानाऽनन्दात्मकपञ्चकोशोत्तरं " ब्रह्मपुच्छं प्रतिष्ठा" इति ज्ञेयं ब्रह्म प्रतिपादितम्। तत्र कोशपञ्चकव्युत्पादनं शुद्धब्रह्मबोधनाय। यथा वा आनन्दवल्लीस्थपञ्चकोशव्युत्पादनं वास्तवशुद्धब्रह्मबोधनाय। एवं प्रकृतिप्रत्ययादिव्युत्पादनं वास्तवस्फोटव्युत्पादनायैवेति।

ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोऽपि बोधसम्भवात् न शास्त्रं तदुपाय इत्यत आह-उपाया इति-उपायस्योपायान्तरादूषकत्वात्। तथाच व्याकरणाभ्यासजन्यज्ञाने वैजात्यं कल्प्यते। मन्त्रजन्यमिवार्थस्मरणे। वेदान्तजन्यमिव ब्रह्मज्ञाने। तस्य च ज्ञानस्य यज्ञादीनामन्तःकरणशुद्धाविव शरीरादिशुद्धावुपयोगः, साक्षात्परम्परया वा स्वर्गमोक्षादिहेतुत्वञ्च।

तदुक्तं वाक्यपदीये-

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।
अत्रातीतविपर्यासः केवलामनुपश्यति।। इति।

नचालीकया प्रकृतिप्रत्ययकल्पनया कथं वास्तवस्फोटबोधः, तस्या अलीकत्वासिद्धेर्वक्ष्यमाणत्वात्। एवम्'रेखागवयन्यायः' आदिपदेन गृह्यते ।। ६९ ।।

ननु स्फोटस्य वर्णजातीनाञ्च नित्यतया ककार उत्पन्न इति न स्यात्। वायुसंयोगनिष्ठजातेः स्फोटे भाने कादिप्रतीतीनां भ्रमत्वापत्तिश्चेत्यत आह-

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि।
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णोभ्योऽन्यस्य मन्वते ।। ७० ।।

स्वीकारस्थलमाह-स्वरदैर्घ्याद्यपीति। आदिनोत्पत्तिविनाशसंग्रहः। उदात्तत्वादि न वर्णनिष्ठम्, तस्यैकत्वात्, नित्यत्वाच्च। तच्च, स एवायमिति प्रत्यभिज्ञानात्। नच गत्वावच्छिन्नप्रतियोगिताकभेदा-भावस्तद्विषयः। व्यक्तयंशाभेदस्यापि भासमानस्य विना बाधकं त्यागायोगत्। नचोत्पत्तिप्रतितिर्बाधिका, प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्वर्णोष्वनुभवविरुद्धत्वात्। अत एव वर्णमुच्चारयतीति प्रत्ययः, नतूत्पादयतीति प्रत्ययोव्यवहारश्च। उच्चरितत्वञ्चताल्वोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। किञ्च व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परया वर्णनिष्ठत्वविषयत्वेनाऽप्युपत्तेर्न साऽतिरिक्तवर्णसाधिका। परम्परया वर्णानिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम्। साक्षात्सम्बन्धाशे भ्रम इत्यविशिष्यते।

तदपि सोऽयमित्यत्र व्यक्तयभेदांशे तव भ्रमत्ववत्तुल्यम्। परन्तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पना नेति लाघवमतिरिच्यते। नच वर्णस्थले ध्वनिसत्त्वे मानाभावः, तदुत्पादकशङ्खाद्यभावेन तदसम्भवश्चेति वाच्यम्, ककाराधुच्चारणस्थले तत्तत्स्थानस्य जिह्वाया ईषदन्तरपाते वर्णानुत्पत्तेर्ध्वन्युत्पत्तेश्च दर्शनात्, जिह्वाभिघातजवायुकण्ठसंयोगादेर्ध्वानिजनकत्वल्पनात्। तस्य च वर्णोत्पत्तिस्थलेऽपि सत्त्वात्तवैव प्रतिबन्ध्यप्रतिबन्धकभावकल्पना निष्प्रमाणिकी स्यादिति विपरीतगौपवम्। एवं परस्परविरोधादुदात्तत्वानु-दात्तत्वह्स्वस्वत्वदीर्घत्वादिकमपि न वर्णतिष्ठं युक्तमिति तेषामभिप्रायः। एवञ्चोत्पत्त्यादिप्रतीतीनां तत्प्रमात्वस्य

च निर्वाहः परोषमपि समान इति प्रतिबन्द्यैवोत्तरमिति भावः ।। ७० ।।

इत्थञ्च पञ्चधा व्यक्तिस्फोटाः।

जातिस्फोटनिरूपणम्

जातिस्फोटमाह--

शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्।
औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत् ।। ७१ ।।

अयं भावः-वर्णास्तावदावश्यकाः। उक्तरीत्या च 'सोऽयं गकारः' इतिवत्, योऽयं गकारः श्रुतः सोऽयं हकार इत्यपि स्यात्, स्फोटस्यैकत्वात्, गकारोऽयं न हकार इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयम्, न वा ? आद्ये तदेव गकारोऽस्तु। वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथाचातिरिक्तस्फोटकल्पने एव गौपवम्। अन्त्ये-गकारादिप्रतीतिविरोधः। वायुसंयोगवृत्ति, ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न, प्रतीतेर्विना बाधकं भ्रमत्वायोगात। अस्तु वा वायुसंयोग एव गकारोऽपि। तस्यातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन। तस्मात् सन्त्येव वर्णाः, परन्तु न वाचकाः, गौरवात्, आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकस्यापि युक्तत्वाच्च।

इदं हरिपदमित्यनुगतप्रतीत्या हर्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात्। नच वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः, घटघटत्वादेरपि संयोगविशेषविशिष्टमृदाकारादिभिश्चान्यथासिद्धयापत्तेः।

तस्मात् सा जातिरेव वाचिका, तादात्म्येनावच्छेदिका चेति। ननु सरो रस इत्यादौ तयोर्जात्योः सत्त्वादर्थबोधभेदो न स्यादित्यत आह-औपाधिको वेति। वा त्वर्थे । उपाधिरानुपूर्वी, सैव जातिविशेषाभिव्यञ्जिकेति भेदः करणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः। उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह-वर्णानामिति ।। ७१।।

ननु जातेः प्रत्येकं वर्णोष्वपि सत्त्वात् प्रत्येकादर्थबोधापत्तिः स्यादित्यत आह

अनेकव्यक्तयभिव्यङ्ग्या जातिः स्फोट इति स्मृता।
कैश्चत् व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।।७२ ।।

अनेकाभिर्वर्णव्यक्तिभिरभिव्यक्तैव जातिः स्फोट इति स्मृता। योगार्थतया बोधिकेति यावत्। एतेन स्फोटस्य नित्यत्वात्सर्वदार्थबोधापत्तिरित्यपास्तम्।

अयं भावः - यद्यपि वर्णस्फोटपक्षे उक्तदोषोऽस्ति। तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति कैश्चित् व्यक्तयो ध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्ते इति शेषार्थः। उक्तं हि काव्यप्रकाशे-"बुधैर्वैयाकरणौः प्रधानीभूतस्फोटरूपव्यङ्गयव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः" इति ।। ७२ ।।

जातिनिरूपणम्

ननु का सा जातिस्तत्राह-

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ।
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ।। ७३ ।।

प्रतिभावम्=प्रतिपदार्थम्। सत्यांशो जातिः, असत्या व्यक्तयः। तत्तद्व्यक्तिविशिष्टब्रह्मैव जातिरिति भावः। उक्तञ्च कैयटेन "असत्योपाध्यवच्छिन्नं ब्रह्मतत्वं द्रव्यशब्दवाच्यमित्यर्थः" इति। "ब्रह्मतत्त्वमेव शब्दस्वरूपतया भाति" इति च । कथं तर्हि, ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्वादनित्यत्वम्, "आत्मैवेदं सर्वम्' इति श्रुतिवचनादिति कैयटः सङ्गच्छताम्। अविद्या आविद्यको धर्मविशेषो वेति पक्षान्तरमादायेति द्रष्टव्यम् ।। ७३ ।।

तमेव सत्यांशे स्पष्टयति-

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ।। ७४ ।।

अयमर्थः-"नामरूपे व्याकरवाणि" इति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव नाम्नोऽपि तदेव तत्त्वम्। प्रक्रियांशस्त्वविद्याविजृम्भणमात्रम्। उक्तञ्च
वाक्यपदीये-

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम् ।। इति ।।

ब्रह्मैवेत्यनेन "अत्रायं पुरुषः स्वयञ्ज्योतिः" "तमेव भान्तमनुभाति सर्वम्" " तस्य भासा सर्वमिदं विभाति" इति श्रुतिसिद्धस्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकस्फोट-शब्दाभिधेयत्वं सूचयति। निर्विघ्नप्रचारायान्ते मङ्गलं स्तुतिनतिरूपमाह-पूर्णात्मने इत्यादिना ।। ७४ ।।

अशेषफलदातारमपि सर्वेश्वरं गुरुम्।
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ।। १ ।।
भट्टोजीदीक्षितैः श्रेष्ठैर्निर्मिताः कारिकाः शुभाः।
कौण्डभट्टेन व्याख्याताः कारिकास्ताः सुविस्तरम् ।। २ ।।

इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टाऽत्मजकौण्डभट्टकृते
वैयाकरणभूषणसारे स्फोटवादः।